Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४७२३

Title प्रतापनारसिंहः

Author रुद्रदेवः लोरोनारायणपुत्रः

Extent ३८ पत्राणि Age सं. १८३५

Subject धर्मशास्त्रम्

यज्ञापनारसिंहाख्यः संस्कारप्रकाशः

४७१३

धृ दि

पद्धतिः व. ६

११

४७१३

पंडितश्यामदेवसूनोः सूर्यदेवस्ये वस्ता ६

दं पुस्तकं सन्यासपद्धतिपात्राणि ३८ सन्यासी ५५

श्रीगणेशाय नमः॥ अथ विदुषां प्रतिसन्न्यासं कर्त्तुं ब्रह्मानंदीय पद्धत्यनुसारेण प्रयोगमात्रमुच्यते। तत्रादौ औपासना
ग्निमंतं यजमानं प्रति ताद्दशो विधुरं प्रति च प्रयोगः। तत्रादौ निस्पृहः सर्वतः शांत इत्यादि लक्षणैर्युक्तं भिक्षुं गुरुं संशोध्य
तन्निकटे वर्षमेकं षण्मासं त्रिमासं मासं वा वसन् यतिधर्मान् संवीक्ष्य सर्वैषणा यजन्न निषिद्ध प्रतिग्रहान्निवृत्तो गा
यत्री जप रुद्राध्याय जप कुष्मांड होम रूप एवं चरणमादौ कृत्वा गुरोराज्ञां च लब्ध्वा उत्तरायणादौ प्रशस्ते काले समार
भेत। कस्यांचित् प्रशस्तायां तिथौ कृतमाध्याह्निकः सायाह्ने गंगादौ देशकालौ संकीर्त्य अमुकशर्मणो मम करिष्यमाण सन्न्या
से योग्यता सिध्यर्थं चतुः कृच्छ्रात्मकं प्रायश्चित्तं प्रति कृच्छ्रमेकैक गो निष्क्रय द्रव्यद्वारा अहमाचरिष्ये। इति संकल्प पूर्वकं
ब्राह्मणेभ्यो दत्वा एकादश्यां द्वादश्यां वा ब्रह्म रात्रिर्यथा भवति तथा श्राद्धान्यारभेत। तत्र सन्न्यासे अधिकारार्थं स्वस्य
नवश्राद्ध षोडशश्राद्धानि च साग्निः पार्वणविधिना निरग्निकस्त्वेकोद्दिष्ट विधिना कुर्यात्। सपिंडीकरणमपि केषांचि
न्मते नोक्तं तत्कर्त्तव्यं चिकीर्षायां तदपि कार्यं। एषां नवश्राद्धादीनां प्रयोगास्तु ब्रह्मानंदीय पद्धतौ ज्ञेयाः। केचित्तु नवश्राद्धा गण०
देः सपिंडीकरणस्य च नावश्यकं। अच्युताश्रमी पद्धतावनुक्तत्वात् आचाराभावाच्च। अथाष्टौ श्राद्ध प्रयोगस्तत्रापस्तंबः १

यजमानकर्तृके अग्नौकरणे होममंत्रे ऊहस्यासंभवात् पिंडदाने विकल्पदर्शनात् सांकल्पविधिरेवावतिष्ठते। आश्वला
यनानां तु स्वाहाकारेण चाग्निपर्वयज्ञोपवीती अग्नौकरणे विधिसाम्नानात् पिंडदाने विकल्पदर्शनात् पार्वणविधिरेवात
त्रापस्तंबानां प्रयोगः। श्राद्धपाकादन्येनान्नेन वैश्वदेवं कृत्वा। ततो नद्यादौ गत्वा प्राङ्मुखो यज्ञोपवीती यवसहितजलेन श्रा
द्धदेवतानां तर्पणमादौ कुर्यात्। तर्पणप्रकारस्तु। ब्रह्माणं तर्पयामि। विष्णुं तर्पयामि। महेश्वरं०। देवर्षींस्त०। ब्रह्मर्षींस्त०। वसूं
स्त०। रुद्रांस्त०। आदित्यांस्त०। सनकं०। सनंदनं०। सनातनं०। पृथिव्यादीनि पंच महाभूतानि त०। एकादशचक्षुरादीनि करणानि त०।
चतुर्विधभूतग्रामं तर्प०। पितरं त०। पितामहं०। प्रपितामहं त०। मातरं०। पितामहीं०। प्रपितामहीं०। आत्मानं तर्पयामि०। पितरं०। पिता
महं०। इति तर्पणं विधाय गृहमागत्य देशकालौ संकीर्त्य अशेषदुःखनिवृत्तिनिरतिशयानंदप्राप्तिपरमपुरुषार्थप्राप्तये
करिष्यमाणपरमहंससन्यासस्वीकारार्थं तदंगत्वेनाष्टौ श्राद्धानि सदैवानि सांकल्पविधिना अन्नेन आमद्रव्येण वाहंत्रेण क
रिष्यमाण इति संकल्प्य। सत्यवसुसंज्ञका विश्वेदेवानां दीक्षुखास्थाने क्षणः कर्तव्यः। इत्येवं त्रातथैव द्वितीयं वृणुयात्। एवं स
र्वत्र। प्रथमे देवश्राद्धे०। ब्रह्मविष्णुमहेश्वराः नांदीमुखास्थाने क्षणः कर्तव्यः। एवं द्वितीये। द्वितीये ऋषिश्राद्धे। देवर्षिब्रह्मर्षिरु

वर्षयः नांदीमुखाः स्थाने क्षणः कर्त्तव्यः ।२। तृतीये दिव्यश्राद्धे वसुरुद्रादित्याः नांदीमुखाः स्थाने क्षणः कर्त्तव्यः ।३। चतुर्थे म
नुष्यश्राद्धे सनकसनंदनसनातनाः नांदीमुखाः स्थाने क्षणः कर्त्तव्यः ।४। पंचमे भूतश्राद्धे पृथिव्यादीनि पंचमहाभूता
नि एकादशाचतुरादीनि करणानि चतुर्विधो भूतग्रामा नांदीमुखाः स्थाने क्षणः कर्त्तव्यः ।५। षष्ठे पितृश्राद्धे पितृपितामहप्र
2 पितामहा नांदीमुखाः स्थाने क्षणः कर्त्तव्यः ।६। सप्तमे मातृश्राद्धे मातृपितामही प्रपितामह्यः नांदीमुखाः स्थाने क्षणः कर्त्तव्यः ।७।
अष्टमे आत्मश्राद्धे आत्मपितृपितामहाः नांदीमुखाः स्थाने क्षणः कर्त्तव्यः ।८। इत्यष्टौ दश ब्राह्मणा निमंत्र्य तेषां पादान्प्रक्षा
ल्य यथापूर्वं प्राङ्मुखानुदङ्मुखांश्चोपवेश्य प्रार्थयेत् ॥ संन्यासार्थमहं श्राद्धं कुर्वेऽत्र द्विजोत्तमाः ॥ अनुज्ञां प्राप्य यु
ष्माकं सिद्धिं प्राप्स्यामि शाश्वतीं ॥ गर्भवासभयाद्भीतस्तथा तापत्रयादिति ॥ गृहाश्रमेषु मिथ्यामि परं पदमनाम
यं ॥ कुरुष्वेति द्विजैरुक्तः कर्त्ता सर्वत्र द्विजकरे पयो दत्वा स्वष्ठ दूर्वायुग्मं यवसहितं गृहीत्वा सत्यवसुसंज्ञका विश्वेदे
वा नांदीमुखाः इदमासनं इति विप्रस्य दक्षिणभागे आसनं दत्वा एवं द्वितीये विप्रे ततो ब्रह्माद्यष्टपार्वणार्थमुपविष्टेभ्यो ग०ग० २
ऽष्टाब्राह्मणेभ्यो वासनानि दद्यात् ॥ तथा ब्रह्माविष्णुमहेश्वराः नांदीमुखाः इदमासनं ॥१॥ देवर्षिब्रह्मर्षिसप्तर्षयः नांदी

मुखाः इदमासनं ।२। विष्णुरुद्रादित्याः नांदीमुखाः इदमासनं ।३। सनकसनंदनसनातनाः नांदीमुखाः इदमासनं ।४। पृथि
व्यादीनि पंचमहाभूतानि एकादशचक्षुरादीनि करणानि चतुर्विधो भूतग्रामाः नांदीमुखाः इदमासनं ।५। पितृपितामह
प्रपितामहाः नांदीमुखाः इदमासनं ।६। मातृपितामही प्रपितामह्यः नांदीमुखाः इदमासनं ।७। आत्मपितृपितामहाः नांदीमु
खाः इदमासनं ।८। इति सर्वत्रासनं दत्वा पश्चात्सत्यवसुसंज्ञका विश्वे देवाः नांदीमुखाः एष गंधः स्वाहा न मम । ब्रह्मविष्णु
विष्णुमहेश्वराः नांदीमुखाः एष गंधः स्वाहा न मम ।१। देवर्षिब्रह्मर्षिक्षत्रर्षयः नांदीमुखाः एष गंधः स्वाहा न मम ।२। वसुरुद्रा
दित्याः नांदीमुखाः एष गंधः स्वाहा न मम ।३। सनकसनंदनसनातनाः नांदीमुखाः एष गंधः स्वाहा न मम ।४। पृथिव्यादीनि
पंचमहाभूतानि एकादशचक्षुरादीनि करणानि चतुर्विधो भूतग्रामाः नांदीमुखाः एष गंधः स्वाहा न मम ।५। पितृपितामहप्र
पितामहाः नांदीमुखाः एष गंधः स्वाहा न मम ।६। मातृपितामही प्रपितामह्यः नांदीमुखाः एष गंधः स्वाहा न मम ।७। आत्मपि
तृपितामहाः नांदीमुखाः एष गंधः स्वाहा न मम ।८। इति कनिष्ठया द्विर्द्विर्गंधं दत्वा पोद्घात । एवं श्वेतपुष्पधूपदीपाच्छा
दनानि दद्यात् । इमानि पुष्पाणि स्वा । एष धूपः स्वाहा । एष दीपः स्वाहा न । इदमाच्छादनानि भूय इदं स्वाहा न ममेति ॥

ततो द्विजाग्रे भोजनभाजनानि निधायोपस्तीर्य अन्नादि परिविष्य तदभावे आमं तन्निष्क्रयद्रव्यं वा निधाय गा
यत्र्या प्रोक्ष्य पृथिवीति इत्यभिमन्त्र्य । सत्यवसुसंज्ञका विश्वेदेवा नान्दीमुखाः इदमन्नं आमं वा आमनिष्क्र
यद्रव्यं वा यथाशक्ति सोपस्करं स्वाहा हव्यं न ममेति सर्वत्र यथादैवतमन्नत्यागं कृत्वा ततः प्रजापते न त्वदेतान्य
न्यो० ण्णा । अनेन नान्दीमुखा देवादयः प्रीयन्तामिति वदेत् । ततो विप्राः वाग्यमनवर्जं भुंजीयुः । तत्तृप्तेषु प्रास्मै पं
चाक्षन्नमी इति श्रावयित्वा संपन्नमिति सर्वत्र पृष्ट्वा सर्वैः रुचिरमिति वदेयुः । नेदमामारो । ततो आचान्तेषु वि
प्रेषु तांबूलदक्षिणां स्वेन प्राक्नामजक निष्क्रयद्रव्यं दातुमहमुत्सृज्ये इति संकल्प्य पूर्वकं दत्वा उपसंपन्नमि
ति ब्राह्मणान् विसृज्य न दातारः इति वरयाचनं । ब्राह्मणान् प्रदक्षिणीकृत्य प्रार्थयेत् । उत्थाय च ततो विप्रान्
हृष्टपुष्टेन चेतसा । प्रदक्षिणान् ततः कृत्वा नमस्कृत्य द्विजोत्तमान् । क्षंतव्यमिति तान् ब्रूयात् प्रणम्य शिरसा गण०
ततः । सन्यासार्थं मया श्राद्धं कृतमेन द्विजोत्तमाः । अनुज्ञां प्राप्य युष्माकं सिद्धिं प्राप्स्यामि शाश्वतीं । गर्भजन्म ३
जराभीतः संतापत्रयतस्तथा । गुहां प्रवेष्टुमिच्छामि परं पदमनामयमिति प्रार्थ्य नमस्कृत्य कृतं कर्म ईश्वरा

पीणंकुर्यात्।यस्यस्मृत्येत्युक्त्वाविष्णुस्मरणंतेद्विराचमेदिति।इतिनांदीश्राद्धवर्षाद्याब्राह्मणसाध्यसर्वंघनाम
गोत्ररूपवर्जंप्रथमविनत्वैवसंक्षेपरीत्याश्राद्धप्रयोगः।अथाश्वलायनकर्तृकेयजमानेसंकल्पेपार्वणविधि
नाअन्नेनआमेनवाकरिष्यइतिविशेषः।पूर्ववत्क्षणंदत्वाआसनमपिदत्वाब्राह्मणेभ्यःप्राग्ग्रदर्भोपरिविश्वेदेवार्थ
मर्घ्यपात्रमेकं।अष्टौपार्वणार्घमष्टमेवंनवपात्राणिप्राक्संस्थानिनिधायसर्वपात्रेषुद्विपत्रकपवित्रांतर्हितेष्वपःआ
सिच्यशन्नोदेवीरितिसकृन्मंत्रप्रथमेवैश्वदेवार्घ्यपात्रेयवोसिधान्यराजोवा॰स्मृतंइतियवानोप्यद्वितीयाद्य
ष्टसुतिलोसीतिसोहेनप्रतिपात्रंमंत्रमावर्त्यपन्यवानोप्यगंधपुष्पाणितुलसींदद्यात्।ॐहप्रकारस्तु।यवोसिसोम
देवत्योगोसवोदेवनिर्मितः।प्रत्नवद्भिःप्रत्तःपुष्ट्यानांदीमुखान्देवान्प्रीणयाहिनःस्वाहेतिप्रथमपार्वणपात्रे।द्विती
येयवोसीत्यादिनांदीमुखान्षीन्प्रीणयाहिनःस्वाहेतियवावापनं।तृतीयेनांदीमुखान्दिव्यान्प्रीणयाहिनःस्वाहे
ति।चतुर्थेनांदीमुखान्मनुष्यान्प्रीणयाहिनःस्वाहेति।पंचमेनांदीमुखान्भूतानिप्रीणयाहिनःस्वाहेति।षष्ठेनांदीमु
खान्पितृन्प्रीणयाहिनःस्वाहेति।एवंसप्तमाष्टमयोर्यथास्थितःपितरावः।ततःप्रतियुग्ममेकैकमर्घ्यपात्रंस्वाहार्घ्या

इत्यावृत्या निवेद्य सर्वत्रापो दत्वा प्रथमं देवद्विजकरे अर्घ्यपात्रोपरिस्थपवित्रं निधाय पात्रांतरेणार्घ्यपात्रस्थजलम
ईशगृहीत्वा या दिव्या इति मंत्रांते सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः इदमर्घ्यं स्वाहा नमः इत्यर्घ्यं दत्वा ततोऽवशिष्ट
मर्घ्यपात्रस्थितमर्द्धजलेन द्वितीयदेवद्विजे पूर्ववद्दत्वा एवमेवोत्तरत्रमर्घ्यपात्रं द्विधा कृत्वा विनियुज्य प्रतिपार्वणेन नि
चितविप्रद्वये दद्यात् ।२। तानप्रकारस्तु ब्रह्मविष्णुमहेश्वराः नांदीमुखाः इदं वो अर्घ्यं स्वाहा नमः मंत्रविप्रहस्ता अ(?)सृष्टा आ
पोनुमंत्रयेत । या दिव्या आपः पयसा० मंत्रं तु अपो दत्वा एवं द्वितीये ।३। देवर्षिब्रह्मर्षिक्षत्रर्षयः नांदीमुखाः इदं वो अ
र्घ्यं स्वाहा नमः मा या दिव्या० मंत्रं तु ।४। वसुरुद्रादित्या नांदीमुखाः इदं वो अ० या दि० मंत्रं तु ।५। सनकसनंदनसनातनाः नां
दीमुखाः इदं वो अ० या दि० मं तु ।६। पृथिव्यादीनि पंचमहाभूतानि एकादशचक्षुरादीनि करणानि चतुर्विधाभूतग्रामाः नां
दीमुखाः इदं वो अ० या दि० मं तु ।७। पितृपितामहप्रपितामहाः नांदीमुखाः इदं वो अ० या दिव्या० मं तु ।८। मातृपितामहीप्रपि गा॰ला॰
तामह्यः नांदीमुखाः इदं वो अ० या दि० मं तु ।९। आत्मपितृपितामहाः नांदीमुखाः इदं वो अ० या दि० मं तु ।१०। सर्वत्रार्घ्यं दत्वेत ४
त्पात्रं न्युब्जीकृत्य पूर्वोक्तरीत्या गंधाद्याच्छादनदानांते भोजनपात्राण्यासाद्य अग्नौकरणार्थमन्नमादाय घृतान्तं कृत्वा

आमपक्षे तंडुलान्गृहीत्वावदानसंपत्सावदाय अग्नये कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहेति मंत्राभ्यां वैश्वदे
विकविप्रो विहायावशिष्टषोडश ब्राह्मणकरेषु हुत्वा मधुरद्रव्याण्यन्नानि परिविष्य आमपक्षे आमं तन्निष्क्रयद्रव्यं वा
अष्टादश पात्रेषु निधाय पर्वोक्तरीत्या रुचिरमिति वदेयुः। नेदमामादौ इत्संतं कृत्वा चांते शुद्धिजेषु दूर्वायव लाज दधि बदरा
फलयुतमन्नेन आमपक्षे सक्तुना वा पिंडदानं कुर्यात्। यथा। गोमयोपलिप्त भूमौ अपहतेति मंत्रावृत्या दक्षिणाग्रं प्रा
गायता उदक्संस्थाः अष्टरेखाः कृत्वा ताश्च स्पृष्ट्वा सर्वासु प्रागग्रांश्च कुशानतिदीर्घ दूर्वान्वा आस्तीर्य तासु रेखासु द
क्षिणरेखामारभ्य प्रतिरेखां पिंडत्रयार्थं स्थलत्रये प्राक्संस्थं शुंधंतामित्याद्यैर्मंत्रैर्जलं सिंचेत्। मंत्राश्च। शुंधंतां नांदीमु ब्रह्मणोप
खाः। शुंधंतां विष्णवो नांदीमुखाः। शुंधंतां महेश्वरो नांदीमुखाः। तदुत्तरद्वितीयरेखायां। शुंधंतां देवर्षयो नांदीमुखाः। शुंधं
तां ब्रह्मर्षयो नांदीमुखाः। शुंधंतां क्षत्रियर्षयो नांदीमुखाः। २। तृतीयरेखायां। शुंधंतां वसवो नांदीमुखाः। शुंधंतां रुद्रा नांदीमु
खाः। शुंधंतामादित्या नांदीमुखाः। ३। चतुर्थरेखायां। शुंधंतां सनका नांदीमुखाः। शुंधंतां सनंदना नांदीमुखाः। शुंधंतां सना
तना नांदीमुखाः। ४। पंचमरेखायां। शुंधंतां पृथिव्यादीनि पंचमहाभूतानि नांदीमुखानि। शुंधंतां एकादश चक्षुरादीनि करणा

नि नांदीमुखानि ।शुंधंतां चतुर्विधभूतग्रामा नांदीमुखाः ।५। षष्ठरेखायां ।शुंधंतां पितरो नांदीमुखाः ।शुंधंतां पितामहा
नांदीमुखाः ।शुंधंतां प्रपितामहा नांदीमुखाः ।६। सप्तमरेखायां ।शुंधंतां मातरो नांदीमुखाः ।शुंधंतां पितामह्यो नांदीमुखाः
शुंधंतां प्रपितामह्यो नांदीमुखाः ।७। अष्टमरेखायां ।शुंधंतां मातामहा नांदीमुखाः ।शुंधंतां पितरो नांदीमुखाः ।शुंधंतां पि
तामहा नांदीमुखाः ।८। इति सर्वत्र जलं निनीय ।पूर्वोक्तद्रव्यैरष्टाचत्वारिंशत्पिंडान्कृत्वा उक्तरेखासु कृतजलसेकस्थले
एकैकस्यै देवतायै पिंडद्वयं दद्यात् ।प्रतिपिंडमत्रावत्त्रिदितिनारायणवत्त्रिकारः ।मंत्रांतरे तु द्वितीयस्तत्स्थलीमिति ।पिं
डदानमंत्रास्तु ।नांदीमुखाय ब्रह्मणे स्वाहा ।तदुत्तरतः पूर्वतो वा द्वितीयः ।एवं सर्वत्र ।१। नांदीमुखाय विष्णवे स्वाहा ।
२। नांदीमुखाय महेश्वराय स्वाहा ।३। द्वितीयरेखायां ।देवर्षिभ्यो नांदीमुखेभ्यः स्वाहा ।४। ब्रह्मर्षिभ्यो नांदीमुखेभ्यः स्वा
हा ।५। राजर्षिभ्यो नांदीमुखेभ्यः स्वाहा ।६। तृतीयरेखायां ।वसुभ्यो नांदीमुखेभ्यः स्वाहा ।७। रुद्रेभ्यो नांदीमुखेभ्यः स्वाहा । गण॰
८। आदित्येभ्यो नांदीमुखेभ्यः स्वाहा ।९। चतुर्थरेखायां ।सनकाय नांदीमुखाय स्वाहा ।१०। सनंदनाय नांदीमुखाय स्वाहा ५
।११। सनातनाय नांदीमुखाय स्वाहा ।१२। पंचमरेखायां ।पृथिव्यादिपंचमहाभूतेभ्यो नांदीमुखेभ्यः स्वाहा ।एकादशचक्षु

रादिकरणेभ्यो नांदीमुखेभ्यः स्वाहा।१४। चतुर्विधाय मत्यग्रामाय नांदीमुखाय स्वाहा।१५। षष्ठमरेखायां। पित्रे नांदीमुखा
य स्वाहा।१६। पितामहाय नांदीमुखाय स्वाहा।१७। प्रपितामहाय नांदीमुखाय स्वाहा।१८। सप्तमरेखायां। मात्रे नांदीमु
खायै स्वाहा।१९। पितामह्यै नांदीमुखायै स्वाहा।२०। प्रपितामह्यै नांदीमुखायै स्वाहा।२१। अष्टमरेखायां। आत्मने नां
दीमुखाय स्वाहा।२२। पित्रे नांदीमुखाय स्वाहा।२३। पितामहाय नांदीमुखाय स्वाहा।२४। अत्र पितरो मादयध्वमित्या
द्यंतमंत्रपाठादि सर्वं कृताकृतं पिंडानां प्रतिदिनासंपत्त्यनमस्कृत्य उमसंपन्नमितिविसृज्य ब्राह्मणेभ्यो पूर्ववद्दक्षि
णादानादि सर्वं कुर्यात् इति। एवमष्टौ श्राद्धान् तरं ब्रह्मसूत्रानुरोधेन तस्मिन्दिने द्वितीयेवा शिखवर्ज्यं मिलित्वा पंचषट्के
शान्स्थापयित्वा कक्षोपस्थवर्जं केशश्मश्रुलोमादिवपनं विधाय नखानि निकृंत्य यथाविधि स्नात्वा कौपीनाच्छादना
द्युपयुक्तं स्वात्मन आचार्याय दक्षिणार्थं होमार्थं च द्रव्यं पृथक्कृत्वा सति विभवे पुत्रदाराश्रितादिभ्यो धनादिभ्यो ध
नादि विभज्य संतर्प्य स्वीयं धनं सन्यासहायेभ्यो विप्रेभ्यो यतिभ्यश्च विभज्य तदन्तःपाशोपं सर्वमर्थीभ्यो दद्यात्। अस
ति विभवे स्वात्मानमेव तेभ्यो निवेदयेत्। अथ देवागारे अग्न्यगारे नदीतीरे गोष्ठे अरण्ये वा चौरो दोषोस्य कौपीनादि विव

र्णं कृत्वा वैणवं सकलं साग्रं ग्रंथियुक्तं योनिरहितं अदग्धं सत्वचं शिरःप्रमाणं ललाटान्तं भ्रूप्रमाणं वा दंडमकृशं स्थूलं
समं गोमाप्तिं विप्राणीतं समपर्वग्रंथियुक्तं समुद्रकं संपाद्य भार्गवो द्वेन ॐ प्रणवेन पुरुषसूक्तेन च केशवादिना
मंत्रैरभिषिच्य संस्थाप्य। सर्वसारोदं ॐ जलपवित्रं च शिक्यं पात्रं कमंडलुं। आसनं कौपीनमाछादनं कंथापा
दुके इति दंडाय ष्टिं जलपवित्रं च शिक्यं पात्रं कमंडलुमिति पंच वा संस्थाप्योपविश्य। उदगयनादौ एकादश्यां द्वादश्यां
वा आतुरश्चेत्कस्मिंश्चित्काले वा देशकालौ स्मृत्वा परमहंसादिसन्यासग्रहणं करिष्य इति संकल्प्य। तदंगत्वेन वि
6 हितमादौ गणेशपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धानि करिष्य इति संकल्प्य तानि कृत्वा। आचम्य प्राणाना
यम्य ब्रह्मांजलिं विधाय मनसा जपेत्। ॐ ब्रह्मणे नमः। ॐ विष्णवे नमः। ॐ रुद्राय नमः। ॐ सूर्याय नमः। ॐ सोमाय नमः।
ॐ आत्मने नमः। ॐ अंतरात्मने नमः। ॐ परमात्मने नमः। इत्युच्चार्य वेदादीन् जपित्वा सक्तुमुष्टित्रयं प्रणवेन त्रिः प्राश्य आ
चम्य नाभिमात्रोदके स्थित्वा मंत्रं जपेदेभिर्मंत्रैः। ॐ भूः आत्मने स्वाहा। ॐ भुवः अंतरात्मने स्वाहा। ॐ स्वः परमात्मने स्वाहा। ॐ प्रजाप गतं०
तये स्वाहा इति। ततः पयो दधि घृतमाज्यं वा अपो वा त्रिवृदसीति प्रथमं प्रवृदसीति द्वितीयं विवृदसीति तृतीयं प्राश्य ६

आपः पुनन्त्विति जलं प्राश्याचम्योपविश्य। ततः उपवासं करिष्यामीति संकल्पयेत्। ततः सावित्रीं प्रविशेत्। ॐ भूः
सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं। ॐ भुवः सावित्रीं प्रविशामि। भर्गो देवस्य धीमहि। ॐ स्वः सावित्रीं प्रविशामि।।
धियो यो नः प्रचोदयात्। ॐ भूर्भुवः स्वः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदया
त् इति जपित्वा किंचन प्राश्नीयात्। ततः अस्तमयात् प्राग् औपासनाग्निं समिध्य विच्छिन्नश्चेत् पुनः संधानमग्नित्यागप्राय
श्चित्तहोमद्रव्यदानपूर्वकं कुर्यात्। अनाहिताग्निर्विधुरेण पृष्टोदिविविधानेनाग्निमुत्पादनीयः समर्था। आचम्य प्रा
णानायम्य देशकालौ संकीर्त्य ब्रह्मलोकाधानार्थं विधुरकल्पोक्तविधिना विधुराग्निमुत्पादयिष्ये इति संकल्प्य। स्थंडिलं लेखा
पुरोक्षणं व्याहृतिभिः प्रणवेन च श्रोत्रियागाराद् अग्निमाहृत्य अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः। अ
नु सूर्यस्य पुरूत्राच रश्मीननु द्यावापृथिवी आततान इति मंत्रेण स्थंडिलाद् आग्नेय्यां दिशि निधाय पृष्टो दिवि पृष्टो अग्निः पृ
थिव्यां पृष्टो विश्वा ओषधीराविवेश। वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तं इति मंत्रेण स्थंडि
ले जेरवास्तु प्रतिष्ठाप्य तेनैव काष्ठैः समिध्य परिसमुह्य तत्सवितुर्वरेण्यं स्वाहा सवित्र इदं। तां छं तत्सवितुर्वरेण्यस्यां

त्वामाहं व तोसुमतिं विश्वजन्यां। यामस्य कण्वो अदुहत्प्रपीनां सहस्रधारां पयसा महीं गां स्वाहा। सवित्र इदं॥
विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न आसुव स्वाहा। सवित्र इदं। तिस्रः समिधोऽभ्याधाय पुनः परिसमुह्य
पर्यस्य स्मृत्येत्यादि। एवमग्निसिद्धिं कृत्वा विधुराग्निसमिंधनं कुर्यात्। ततो ब्रह्मान्वाधानं। अस्तमानात्पूर्वं प्राणानायम्य
देशकालौ संकीर्त्य परमहंससंन्यासकर्तुं तत्र विहितब्रह्मान्वाधानं करिष्ये इति संकल्प्य। अग्नौ घृताद्याज्यसंस्का
रं ते स्रुक्स्रुवौ संमृज्याग्निं परिषिच्य स्रुचि चतुर्गृहीतं गृहीत्वा ॐ स्वाहेति कृत्वा। परमात्मन इदं। उत्तरपरिषेचनं कृत्वा
7 यस्य स्मृत्येत्यादि। एतद्ब्रह्मान्वाधानं। ततः संध्यावंदनपूर्वकमस्तमित आदित्ये स्वस्याग्नौ नित्यहोमं वैश्वदेवं च कुर्या
त्। अथ सायंहोमानंतरमुत्तरेणाग्निं तरणाग्निं संस्तीर्य निषदं डादीनि दशायष्ट्यादीनि पंचवाद्य दर्भा आसाद्य दक्षिणे
नाग्निं कुशेषु कृष्णाजिनमास्तीर्य तस्मिन्नुपविश्य गायत्रीजपेन जागरणं कुर्यात्। ततो ब्राह्मे मुहूर्ते उत्थाय यथाविधि
स्नात्वा प्रातःसंध्यां प्रातर्होमं वैश्वदेवादिकं कृत्वा प्राणानायम्य व्याहृतीर्जपित्वा आग्नेयस्थालीपाकं कुर्यात्। तत्र प्रयोगः। ग॰ण॰
देशकालौ संकीर्त्य परमहंससंन्यासं करिष्यमाणोऽमुकशर्माहं पूर्वांगत्वेन विहितमाग्नेयस्थालीपाकं करिष्ये इति संकल्प्य। ७

इध्माबर्हिषी सन्नह्य पत्नमवहती चरुं॰ अपयित्वेत्यादि पार्वणस्थालीपाकवत्तत्सर्वं कुर्यात्। आम्याधायनकर्तृके यजमाने सं
कल्पं कृत्वा चत्वारिंशद्गोत्यग्निं ध्यान्वाधास्याल। अस्मिन्नन्वाहितेग्नावित्यादि च स्रुवी आज्येनेत्यंतमुक्त्वा प्रधानदेवता
मग्निं चरुद्रव्येण शेषेणेत्यादि पूर्णपात्रनिधानांते पवित्रे शूर्पे अग्नये त्वा जुष्टं निर्वपामीति चतुरो मुष्टीन्निरूप्य तथैव प्रोक्षे
त्यादि आज्यभागांते प्रधानहोमे अग्नये स्वाहेति हुत्वाय दस्येति स्विष्टकृतं हुत्वा शेषं स्थालीपाकवत्कुर्यादिति। ततो भू
र्भुवः स्व॰ ॰ रित्युपस्पृष्ट्वा तरत्समंदी धावतीति सूक्तं मनसा जपेत्। विप्रान्संभोज्य कर्मणः पुण्याहं वाचयित्वा हेमरूप्य
कुशाक्षतजलैः स्नात्वा देशकालौ संकीर्त्य संन्यासांगत्वेन विहितं प्राणादिहोमपूर्वकं पुरुषसूक्तहोमं तथा ज्ञानयोगसंपा
दनार्थं उपपातकादिसकलपापनिवृत्तिपूर्वकं सावयवशुध्यर्थं च विरजाहोमं च तंत्रेण करिष्ये। इति संकल्प्य। इध्माबर्हि
षी सन्नह्य चत्वारिंशद्देवताहोमपर्याप्तं तंडुलान्पत्नमवहंती। त्यादि पार्वणवदग्निमुखांते प्रधानहोमं कुर्यात्। आम्याधा
यनकर्तृकेन्वाधानं कुर्यात्। चक्षुषी आज्यभागेनेत्यंते प्राणादिपंचदेवता विरजामंत्रैः प्रतिद्रव्यमेकैकसंख्याकाभिः
समिच्चर्वाज्यैः प्रजापतिमेकवारमाज्येन शेषेण स्विष्टकृतमित्यादि पूर्णपात्रनिधानांते षष्ठ्युत्तरशततवारं त्वक्षी निरु

पतथैवप्रोक्ष्य स्रुवघातादिभ्रपमित्वा आज्यभागांतेत्रधानाहुतीर्जुहुयात् दितिविशेषः ॐ प्राणायस्वाहा प्रा
णायेदं० ॐ अपानायस्वाहा अपानायेदं ॐ व्यानायस्वाहा व्यानायेदं० ॐ उदानायस्वाहा उदानायेदं० ॐ समानाय
स्वाहा समानायेदं० ५ ॐ सहस्रशीर्षा० लं स्वाहा १ नारायणायेदं न ममेति सर्वत्र ॐ पुरुषएवेदं० ति स्वाहा २ एता
वानस्य० वि स्वाहा ३ त्रिपादूर्ध्व उदै० मि स्वाहा ४ तस्माद्विराळ० रः स्वाहा ५ यत्पुरुषेण० विः स्वाहा ६ तं यज्ञं बर्हि
षि० पे स्वाहा ७ तस्माद्यज्ञात्सर्वहुतः संभृतं० पे स्वाहा ८ तस्माद्यज्ञात्सर्वहुत ऋचः० त स्वाहा ९ तस्मादश्वा०
यः स्वाहा १० यत्पुरुषं व्यदधुः० ते स्वाहा ११ ब्राह्मणोस्य मुख० त स्वाहा १२ चंद्रमा मनसो० त स्वाहा १३ नाभ्या आ
सी० यन् स्वाहा १४ सप्तास्यासन्परि० भं स्वाहा १५ यज्ञेन यज्ञम० वाः स्वाहा १६ प्राणापानव्यानोदानसमाना मे
शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा १ प्राणादिभ्य इदं० वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिः
संकल्पा मे शुध्यंतां ज्योतिरहं स्वाहा २ वागादिभ्य इदं० त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोस्थीनि मे शुध्यंतां
ज्यो० हा ३ त्वगादिभ्य इदं० शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघाशिश्नोपस्थपायवो मे शुध्यंतां० स्वाहा ४ शिरआदिभ्य इदं० ५

उत्तिष्ठपुरुषहरितपिंगललोहिताक्षिदेहिदेहिददापयितामेशुध्यंतां।पुरुषादिभ्यइदं।५।पृथिव्यापस्तेजोवायुरा

काशामेशुध्यंतां।हा।पृथिव्यादिभ्यइदं।६।शब्दस्पर्शरूपरसगंधामेशुध्यंतां।हा।शब्दादिभ्यइदं।७।मनोवाक्काय

कर्माणिमेशुध्यंतां।हा।मनआदिभ्य।८।अव्यक्तभावैरहंकारैर्ज्योतिरहंविरजामेभु।हा।अव्यक्तादिभ्यः।९।आत्माने

शुध्यंतां।हा।आत्मनइदं।१०।अंतरात्मामेशुध्यंतां।हा।अंतरात्मने।११।परमात्मामेशुध्यंतां।हा।परमात्मने।१२।क्षुधेस्वा

हा।क्षुधइदं।१३।क्षुत्पिपासायस्वाहा।क्षुत्पिपासायेइदं।१४।विविघे।विविघाइदं।१५।ऋग्विधानाय।ऋग्विधानायइ

दं।१६।कषोत्काय।कषोत्कायेदं।१७।क्षुत्पिपासामलंज्येष्ठामलक्ष्मीनाशयाम्यहं।अभूतिमसमृद्धिंचसर्वान्निर्णु

दमेपाप्मानं स्वाहा।क्षुत्पिपासादिभ्यइदं।१८।अन्नमयप्राणमयमनोमयविज्ञानमयमानंदमयमात्मामेशुध्यंतांज्यो

तिरहंविरजाविपाप्माभूयासं स्वाहा।अन्नादिभ्य।१९।इतिसमिच्चर्वाज्यैः प्रतिमंत्रंचत्वारिंशदाहुतीर्हुत्वा।अनेनमं

त्रेणआज्यंजुहुयात।यद्दिष्टंयच्चपर्त्तंयच्चापर्त्तंयच्चापघनापदि।प्रजापतौतन्मनसिजुहोमिविमुक्तोहंदेवकिल्बिषा

त्स्वाहा।प्रजापतयइदं।२०।ततःपुरुषसूक्तंजपेत।वेदादीन्जपित्वाचरोरेकदेशातःस्विष्टकृतंहुत्वासमिधमिध्मसन्नहनं

चाग्नौ प्रहृत्य नजपाद्योदर्व्यौ परिधीनन्तिप्रात्रप्रयुक्तदर्भाग्राज्जीत्यादिदेवतासंकीर्तने अग्निः सोमाग्नी अग्निः प्राणा
दिपंचदेवताः पुरुषसूक्तदेवताः प्राणादिएकोनविंशतिः अग्निः स्विष्टकृत्॥ निरुद्धेत्यादि ब्रह्मविसर्जनात्प्राक् स्वाब्र
ह्मणे हिरण्यपात्रमाज्यं मधुपर्कं कांस्यपात्रं धेनुं च दत्वा विसर्जयेत्। ततो आचार्याय पर्वोद्दिष्टभागं धेनुं च वस्त्राणि
सुवर्णादि दत्वा समाप्य औपासनाग्नेरुपस्थानं कुर्यात्। ॐ संमासिंचंतुमरुतः समिंद्रः संबृहस्पतिः। संमायमग्निः सिंच
त्वायुषा च बलेन चायुष्मंतं करोतु मां इत्यग्निमुपस्थाय तस्मिन्नग्नौ पात्रदाहं कृत्वा तैजसानि मुखवेद्घात्। ततः आ
त्मसमारोपः कर्त्तव्यः। अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आसीदाथा नो वर्द्धया गिरः। या ते अग्ने
यज्ञिया तनूस्तया ह्यारोहात्मात्मानं। अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि। यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो
भुव आजायमानः सक्षय एहि। इति ऋचा यजुषा च त्रिरावर्त्तेन आत्मन्यग्निं समारोपयेत्। अग्नेर्जीवां प्राश्नीयात्। ह ग॰म॰
स्तौ प्रक्षाल्याचम्य। ॐ एह्यग्ने सह प्राणेन शरीरमनुसंचरस्व। नाहं त्वामपहाय परागां मा त्वमपहाय परागाः इत्यग्निं विस ८
र्जेत्। कुम्भानिनमादाय उत्तरउत्तरतो रायणेन गृहान्निष्क्रमेत्। ततः स्वेभ्यः पुत्रेभ्यः आशिषं दद्यात्। सर्वे भवंतु वेदाध्या:

सर्वेभवंतुसोमपाःसर्वेउचमुखंदृष्ट्वासर्वेभवंतुभिक्षुकाःपश्चाद्योग्यंपुत्रंप्रतिकथयति।त्वंब्रह्मत्वंयज्ञस्त्वंलोकःत्वं
सर्वमितिब्रूयात्।सपुत्रःपितरंप्रत्याह।अहंब्रह्महंयज्ञोहंलोकोहंसर्वमिति।यद्यपुत्रः।अहंब्रह्माहंयज्ञोहंसर्वमितिस्व
यमेवजपेत्।शिवंस्वस्त्ययनमस्तुसर्वेभ्यः।तथाहबृहच्छ्रपरिशिष्टे।अथपुत्रान्सुहृदोबंधूनप्रत्याह।नमेकश्चिन्नाहंकस्यचि
दिति।अथबंधुविसर्जनं।प्रयांतुसर्वेश्रीगुरुप्रसादात्संसारस्यपारमहंगंतुकामोस्मि।मयासर्वेषांममतात्यक्ताद्यपु
त्रैषणा।वित्तैषणा।लोकैषणास्त्यक्ताःआयुष्मानिर्ममोपरिममतानकर्तव्यादिग्भोनविधेयः।ततोजलाशयंगत्वाग्रंजलिना
जलमादायअप्रतिरथेनाशुःशिशानइतिसूक्तेनाभिमंत्र्य।ॐसर्वाभ्योदेवताभ्यःस्वाहाइतिसृजेत्।तिथ्यादिस्मरणपूर्वकं
स्नानंविधाय"अपरोक्षब्रह्मलाभायसंन्यासंकरोमिइतिसंकल्प्य।अपांपूर्णांजलिंगृहीत्वा।ॐएषहवाअग्निःसूर्यःप्राणं
गच्छस्वाहा।ॐस्वांयोनिंगच्छस्वाहा।ॐआपोवैगच्छस्वाहा।इतिमंत्रत्रयेणजलेअंजलित्रयंदद्यात्।ततःपुत्रैषणावित्तैषणा
लोकैषणासर्वैषणामयापरित्यक्ताः।अभयंसर्वभूतेभ्यःस्वाहा।इत्यपांपूर्णांजलिंजलेक्षिपेत्।पश्चात्सर्वंब्रह्मेतिचिंतये
त्।नान्यत्।पुनरश्रयंदत्त्वाब्रह्मांजलिंकृत्वापठेत्।यत्किंचिदूष्णंकर्मकृतमज्ञानतोमया।प्रमादादालस्याद्दोषात्तत्सर्वं

10

सत्यजाम्यहं। सत्व(?)विशुद्धात्मा गतस्नेहशुभाशुभः। कामभोगादिकं सर्वं त्यक्त्वं चैषमुदाहरेत्। एतत्त्व ह्याम्यहं सर्वं काम
भोगाः सुखादिकाः। गोघंतोयं विवादं च गंधमाल्यानुलेपनं। भक्षणं नर्त्तनं गेयं दानमादानमेव च। नमस्कारं जपं होमं या
श्च नित्यक्रियामम। नित्यं नैमित्तिकं काम्यं वर्णजधर्माश्रमाश्रये। गुणधर्माश्चये केचिच्छुभाशुभफलजानि च। करणं का
र्यकर्त्तृत्वं कर्त्तारं करणैः सह। सर्वमेव परित्यज्य बुध्या तिष्ठति मानसः। चतुर्विधस्य संपन्नात्माभूतग्रामस्य नित्यशः। कृ
तं वेपितं चैव वांछितं चानुमोदितं। संचितं सर्वभूतेभ्यो दद्यादभयदक्षिणां। पद्भ्यां कराभ्यां विहन्ताहं वा कायमान
सैः। कारिष्ये प्राणिनां पीडां प्राणिनः संतु निर्भयः। देहजा येचान्येद्भ्नौस्थावरा जंगमाश्च ये। लोभवस्त्रादिधान्येषु शयने
ष्वासनेषु ये। तिस्वयंतु विबुध्यंतु सुखतोस्तु भयं विना। दत्वैवं सर्वभूतेभ्यः सर्वत्राभयदक्षिणां। करुणोमैत्ररतिश्च प्रस्ता
वर्द्धिं च संस्थितः। ततो विचिंतयेद्धीमान सर्वमात्मनि संस्थितं। कोस्ति मे कश्च मे नास्ति शुद्ध एकोहमच्युतः। संसारादिस्य
तमोतिविस्तुष्टो देहमानसे। ब्रह्मस्थानां बुधी तेन सिंचं मां वा कायवारिणा। न मे स्ति बांधवः कश्चित्तुक्त्वात्मानं परावरं। ममै गला०
त्मैव परो बंधुरूर्ध्वधिः दृष्टतो यतः। इंद्रियैर्विषयैः सर्वं मध्या घंतब हि स्थितः। विश्वेश्वरो महात्मा वै सर्वज्ञः सर्वतोमुखः। १०

त्तभीरभयंदत्वासर्वभूतमजमीश्वरं।व्यक्ताव्यक्तंपरंशुद्धंसत्यंनिश्चित्यतत्त्वतः।२।एतान्मैषान्छु एवन्नशुद्धोदिशश्चैव
वलोकयन्प्रार्थयेत्।आदित्यश्चंद्रमावनलोनिलश्चद्यौर्भूमिरापोहृदयंमनश्च।अहश्चरात्रिश्चउभेचसंध्येधर्मोहि
जानातिनरस्यवृत्तं।आदित्यश्चंद्रादीन्सर्वान्देवान्कर्मसाक्षिणोनिखिलान्गुर्वादीन्ब्राह्मणान्संन्याससाक्षित्वेनध्या
येत्।ततोनाभिप्रमाणंजलंप्रविश्यप्राङ्मुखःसन्गायत्रींप्रविशामिइतिसंकल्प्य।ॐभूःसावित्रींप्रविशामि।तत्सवितुर्व
रेण्यं।ॐभुवःसावित्रींप्रविशामि।भर्गोदेवस्यधीमहि।ॐस्वःसावित्रींप्रविशामि।धियोयोनःप्रचोदयात्।ॐभूर्भुवःस्वःसा
वित्रींप्रविशामि।सर्वांगायत्रींजपेत्।ॐपरोरजसेसावदों।इतिजपित्वा।चन्यप्रणवमयमात्मानंध्यात्वाजलेस्थितः।
ॐतरत्समंदीधावतीतिचतुर्ऋचंजपित्वाआदित्यमुपतिष्ठेत।पुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थितो
हंभिक्षाचर्यंचरामीत्युक्त्वापाणिनाअप्सुआपोकृत्वाप्रैषोच्चारंकुर्यात्।तदुक्तंबद्धचपरिशिष्टे।ॐभूःसंन्यस्तंमया।ॐ
भुवःसंन्यस्तंमया।ॐस्वःसंन्यस्तंमया।इतित्रिर्मंत्रमध्यमोत्तमस्वरेणोक्त्वा।ॐअभयंसर्वभूतेभ्योमत्तःस्वाहेतिप्राच्यां
दिशिअपांपूर्णांजलिंक्षिपेत्।ततःशिखार्थस्थापितकेशानुत्पाट्ययज्ञोपवीतमप्युद्धृत्यहस्तेगृहीत्वावेदांतविद्या

नमुनिश्चितार्थाः सन्यासयोगाद्यतयः शुद्धसत्वाः। तेब्रह्मलोकेपरांतकालेपरमामृतात्परिमुच्यंतिसर्वे। इतिमंत्रे
णएकीकृत्य केशान्यज्ञोपवीतं च संन्यस्य ॐ आपो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वाहा। ॐ
भूः स्वाहा। इत्यप्सु जलैः सह जुहुयात्। ततो विष्णुप्रार्थनाप्रकारमाह यमः। दत्वा तोयांजलिं विप्रो भक्त्या सं
प्रार्थयेद्धरिं। सर्वदेवात्मके तोये तोयाकृतिमहेश्वरे। दत्वा सर्वं मणं त्यक्त्वा शुभ्मं शरणमागत। त्राहि मां सर्वलो
केश गतिरन्या न विद्यते। सन्यस्तं मे जगन्नाथ पाहि मां मधुसूदन। त्राहि मां सर्वलोकेश वासुदेव सनातन। संन्य
स्तमेस जगद्योने पुंडरीकाक्ष मोक्षद। अहं सर्वाभयं दत्वा भूतानां परमेश्वर। बुध्या शरणमापन्नस्त्राहि मां पुरुषोत्तम।
ततो दंडग्रहणः स नवस्त्रो सत्वा यथाजातरूपधरो दिगंबरो भूत्वा बहिर्भिमाउ दंडग्रहणं पंचवा सप्तवा पदानि गच्छेत्।
जिज्ञासां प्रति आचार्यो दंडवस्त्राणि पस्य प्रतिप्रियं वचनैर्लौकिको व्यवहारार्थं लज्जाद्विवारणार्थं वा सो युग्मलोको गला॰
पकार धर्मशिक्षायै दंडयुक्तं करोति। ततः स्वयं कौपीनं काषायवासः स्वीकृत्य परिधाय आचम्य दंडप्रार्थनां कुर्या
त् ॐ वार्द्धिघ्नः शर्म मे भव यत्पापं तं निवारय। विष्णुहस्ते यथा चक्रं शूलं शिवकरे यथा। इंद्रहस्ते यथा वज्रं तथा दंड न ३३

वाधमे॥ इति दंडं संप्रार्थ्य ॐ इंद्रस्य वज्रोसि सिसखा मां गोपाय इत्यनेन मंत्रेण दंडग्रहणं कुर्यात् प्रणवेन कमंडलुं ग्रही
त्वा तस्तो यावद्गुरुसमीपगमनं तावद्विष्णुस्मरणपरो न वेत् ततो दंडकमंडलुवस्त्रयुक्तः समित्पाणिः गुरुसमीपं
गत्वा नमस्कारं विधाय गुरु आसनेनोपविश्य करसंपुटं कृत्वा गुरुप्रार्थनां कुर्यात्॥ श्रीगुरो भगवान्यस्मात् घोरा
त्समुद्रत्संसारसकलजन्मजरामरणौघपारसंसारात्तस्मान्नेन मां तारय नतानामन्नयं त्वां युष्मच्छरणमागतः त्राहि
मां योगिनामीश नान्यत्त्राता स्ति मे प्रभो॥ निस्पृहः सर्वतः शांतः सर्वविद्याविशारदः॥ सर्वसंशयसंछेत्ता नमस्ते सो गुरुरा
उयं॥ त्रायस्व भो जगन्नाथ गुरो संसारवह्निना॥ दग्धं मां कालदष्टं च त्वामहं शरणागतः॥ अद्यप्रभृति भूतानि नहिंस्या
मि कदाचन॥ महाव्रतं चरिष्यामि कर्मणा मनसा गिरा॥ अविद्याकृष्णसर्पेण दष्टं तद्विषपीडितं॥ तद्वाक्यामृतपानेन संजी
वय पुनर्मृतं॥ इति गुरुप्रार्थना॥ दक्षिणजानु नम्यो नीत्वा पादग्रहणं कृत्वा यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति
तस्मै॥ तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति मंत्रेण गुरुं भगवद्बुद्ध्योपस्थापत तदनंतरं संन्यासाग्नि निर्विष्टदे
हमानसं॥ ब्रह्मज्ञानांबुशीतेन सिंच मां वाक्यवारिणा॥ न मे स्ति बांधवः कश्चित् त्वत्तो ज्ञानं परावरं॥ मम त्वं चैव परो बंधुस्त्व

धीधः पृष्ठतोग्रतः । अधीहि भगवो ब्रह्मेति ब्रूयात् । तस्मै साधनचतुष्टयसंपन्नायाधिकारिणे ब्रह्मचारिणे गुरुर्ब्रह्मो
पदिशेत् । ततो गुरुः स्वहृत्स्थसच्चिदानंददेवरूपात्मानमेवानुसंधाय जलपूर्णशंखं पुष्पादिभिरभ्यर्च्य ह्रस्वप्रणवे
रभिमंत्र्य तेनोदकेन प्रणवेन शिष्यशिरोऽभिषिंचेत् । ततः शन्नो मित्र इत्यादि प्रथमशांतिं त्रिर्वारं पठित्वा शिरसि
हस्तं दत्वा पुरुषसूक्तं जपेत् । ततो दक्षिणवक्षोंतरेण हस्तं शिष्यहृदये निधाय । मम व्रते ते हृदयं दधामि मम चित्तमनु
चित्तं ते अस्तु मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यं । इति दीक्षां दद्यात् । ततः उदङ्मुखाय नित्यसत्य
शुद्धबुद्धपरमानंदाद्वयब्रह्मप्रतिपादकप्रणवं दक्षिणकर्णे प्राङ्मुखः सन्नुपदिशेत् । प्रणवस्यार्थं आचार्यवचनेन
12 बोधयेत् ॐ पंचीकृतपंचभूतेत्यादिना । ततः अयमात्मा ब्रह्म तत्त्वमसि । अहं ब्रह्मास्मि प्रज्ञानं ब्रह्मेत्यादीनि शिष्यशाखा
वाक्योपदेशपूर्वकं उपदिशेदिति । एषामर्थं च बोधयेत् । ततो नाम दद्यात् । वैष्णवमासनाम अथवा यद्वो वनतन्नतीर्थाश्र
मश्रमसंप्रदाये आनंदब्रह्म अद्वैतब्रह्मेत्यादि वनारण्ये । आनंदः । अद्वयानंदः । पूर्णानंदादिगिरिपर्वतसागरेषु चैत गण०
न्यः । राघवचैतन्य केशवचैतन्यादि सरस्वती भारती पुरीषु । वासुदेवस्वरूप नारायणस्वरूपेत्यादिनामानि एवं कुर्यात् । १२

ततो गुरुः शिष्याय परमहंसधर्मानुपदिशेत्। ततो गुरुः शिष्यपरीक्ष्यतस्मै अधीतविद्यस्य पर्यंकशौचादिकारयित्वा योगपट्टं दद्यात्। योगपट्टं विना संन्यासदाने अधिकारो नैव। तत्र पर्यंकशौचप्रकारः। वामे न्यागतपादाभ्यां स्वहस्ताभ्यां च दक्षिणे। मृद्भिभागं विभज्याथ गरुडासनस्थितः। मृत्तिकास्थापने यं भोक्ताः। पादयोश्चमृदः पंच चतस्रस्तिस्र एव च। द्वे चैकां मृदं दद्याज्जानुजंघादितः क्रमादिति। मृत्क्षेपने संख्या नियमो स्थाननियमश्चोक्तः। करयोर्दश सप्त सैद्वितीये सप्त पंच च। तृतीये षट् चतस्रश्च तिस्रो द्वे च चतुर्थके। द्वे चैका च मृदं दद्यात् शौचे पर्यंकसंज्ञके ति। पादप्रक्षालनेकर्तुःकरस्थ ध्यर्थमिदं वाक्यं। अथात्र प्रयोगः। उक्तदिने गुरुणा प्रेरितेक श्चिन्नरः स्वच्छः शुद्धप्रदेशात् मृदमादाय द्विधा विभज्य एकं भागं पंचधा विभज्य वामभागे प्राक्तनसंनिधाय अपरं भागं तथैव विभज्य स्वदक्षिणभागे पूर्ववत्संस्थाप्य उभयत्र मृज्जलमपि संस्थाप्य स्वाग्रे पीठादौ अभ्यागतं तिं तिमुपविश्य तत्स्थतो गरुडासनेन प्राङ्मुखो देशिकाभ्यांसंकीर्त्य गुरुदेशे या अभ्यागतायतये पर्यंकशौचं करिष्यामीति संकल्प्य पूर्वनिहितवामभागस्थपंचमृत्पिंड मध्ये प्रथमभागेन पंचवारं मृज्जलाभ्यामभ्यागतजानुनी युगपत्स्वदक्षिणवामकराभ्यां क्षालयेत्। पंचमृत्समाप्तिः। एवमुत्तरत्र। ततः कर्ता स्वहस्त

प्रक्षालनार्थं दक्षिणभागस्थमल्लिंडपंचकेषु प्रथमभागस्यार्द्धेन स्ववामकरं दशवारं तत्रस्थैव जलेन प्रत्येकं प्रक्षाल्य
अवशिष्टार्धेन उभयकरौ सप्तवारं जलेन च क्षालयेत् । एवमन्यत्रापि योज्यं संख्यायां विशेषः । ततो वामभागस्थ
द्वितीयमल्लिंडेनाभ्यागतस्य युगपच्चतुर्वारं द्वे जंघे क्षालयेत् । दक्षिणभागस्थद्वितीयमल्लिंडार्धेन स्ववामकरं प्रक्षाल्या
वशिष्टार्धेन उभौ करौ पंचवारं क्षालयेत् । ततो वामभागस्थतृतीयमल्लिंडेनाभ्यागतस्य गुल्फौ त्रिर्वारं प्रक्षाल्य दक्
षिणभागस्थमल्लिंडतृतीयार्धेन स्ववामकरं षड्वारं प्रक्षाल्यावशिष्टार्धेन उभौ करौ चतुर्वारं क्षालयेत् । ततो वामभाग
13 स्थचतुर्थमल्लिंडे नाभ्यागतस्य पादपृष्ठौ द्विर्वारं प्रक्षाल्य दक्षिणभागस्थमल्लिंडचतुर्थार्धेन स्ववामकरं चतुर्वारं प्र
क्षाल्यावशिष्टार्धेनोभौ करौ द्विर्वारं क्षालयेत् । ततो वामभागस्थावशिष्टमल्लिंडपंचमेनाभ्यागतपादतले एकवारं प्रक्षा
ल्य दक्षिणभागस्थपंचमस्यार्धेन स्ववामकरं द्विर्वारं प्रक्षाल्यावशिष्टार्धेन एकवारमुभौ करौ क्षालयेदिति गुरूणामा
देशपर्यंकाशौचे मज्जनाभ्यां स्वयमभ्यागतः पीठा .. दानेव स्थितः कटिशौचं विधाय गुर्वन्तस्त्यागपादुकाभ्यां गन्तुं प्रव गण।०
स्यद्विगुणकटिसूत्रं बध्वाऽन्यद्वस्त्रेणावगुंठ्य वामपूर्वमेव कम्पितेऽञ्चासने गुर्वन्तस्त्यागउपविश्य सभ्यैः सहवेदान्तो २३

किंचिदुपन्यसेत्॥ ततो गुरुणा विधिना न्यासपूर्वं शंखेन शिष्यशिरस्यभिषेकं कृत्वा वस्त्रमाल्यधूपदीपनानानैवेद्यैः संप
ज्यस्तोत्राणि पठेत्॥ ततो वस्त्रं चोपरि संधार्य बंधुभिर्यतिभिः सह विश्वरूपाध्यायं परस्पाभिदेवानित्यादि ऊर्ध्वराज्यसमृद्धमि
त्यंतं पठित्वा ततो गुरुणा सर्वसंमतं पूर्वमेव कल्पितं नामदद्यात्॥ ततो गुरुः शिष्यं प्रत्याहाऽत्र
यप्रभृति त्वया संन्यासाधिकारिणः संन्यासोदेशः तथाऽधीतस्यदीक्षाव्याख्याचदेयाप
गपदृष्टादिति॥ तथा गुरून्ज्येष्ठयतीन्कसंयोरकं नमस्कुर्यादिति॥ त्यादि संन्यासिने गुरुणाज्ञातो
कृत्वा शिष्येण शिरसा तामाज्ञां प्रतिगृह्य ततो गुरुः कटिसूत्रं पंचमुद्रालंकृतं दंडं च तमेव दत्वा
मथासंप्रदाये शिष्यं नमस्कुर्यात्॥ अन्येपि यतयो गुरुं च नमस्कुर्वंति शिष्यो नारायणेत्ति
मुक्त्वा॥ तदासनादुत्थाय उच्चासने गुरोरूपवेशयित्वा शिष्यो यथोपदेशं ज्येष्ठिकापादयुग्महँदिन मस्कारान् गुरोरन्येषां
चकुर्य२ यतीनामपि ति॥ इति प्रतिष्ठानपुरवासीतो नारायणात्मजनरुद्रदेवकृते प्रतापनारसिंहाख्ये संस्कारप्रकाशे विद्वत्
प्रतिसंन्यासो ब्रह्मानंदीपदस्पद्गुरुस्त्वत्रौपासनाग्निमतं यजमानं तादृशं विदुरं प्रति च प्रयोगः॥ अथाहिताग्निवि

॥	योगपदृष्टु॥ ॥
५	जानु ३० वाम ७ ३ भ
४	जंघ ७ वाम ५ च भ
३	गुल्फ द्वाम ४ ३ भ
२	पादपृष्ठ ८ वाम २ ३ भ
१	पादतल २ वाम १ ३ भ

मयेविशेषः। तत्रश्रौताग्नयोविच्छिन्नाश्चेत्पुनराधानमिष्टं तंपूर्णाहुत्यंतंवाप्रायश्चित्तादिकुर्यात्। विधुरोग्निहो
त्रीतु पूर्वमेवाग्निकाण्डमंडनोक्तरीत्याकुशपत्न्यासह पावमानेष्टं तंपूर्णाहुत्यंतंवाधानंकृत्वाकुर्यात्। तथाभा
र्यायांमृतायांतयासहवह्निषुगतेषुसोपिविधुराग्निः मंडनोक्तदिशाएकाकीपावमानेष्टं तंपूर्णाहुत्यंतंवाधा
नंपूर्वमेवकृत्वापूर्वोक्तकालेप्रायश्चित्तंकृत्वापर्वणिप्राजापत्यास्थानेसर्वमष्टौश्राद्धमपिकृत्वापुण्याहवा
चनादिसावित्रीप्रवेशांतंपूर्ववरीत्याकृत्वाकालेब्रह्मौदनंवाधानंकुर्यात्। तत्रप्रकारः। अस्तमयात्पूर्वंगार्हपत्यंप्रज्व
ल्यदक्षिणाग्निप्रणीयाहवनीयंविहृत्यअग्नित्रयमुपसमिध्यब्रह्मौदनमुपवेश्यआज्यंसंस्कृत्यस्रुक्स्रुवंचसं
मृज्यस्रुचिद्वादशवारंचतुर्वारंवाआज्यमानीयसमुत्तमिद्धेआहवनीये ॐस्वाहेतिपूर्णाहुतिंकृत्वापरमात्मनइदं
नममेतित्यजेत्। ततःसंध्यावंदनपूर्वकंतेष्वेवाग्निषुअग्निहोत्रहोमःकर्तव्यः। सर्वप्रायहोमार्थंसमारोपार्थमिष्ट्य
र्थंचनपुनःकृताकारः। सायंहोमांतेउत्तरेणगार्हपत्यंतृणानिसंस्तीर्यद्वंद्वशःपात्राणिसादयित्वाकौपीनादिपश्च ग.ए.
र्थंआहवनीयदक्षिणतोदर्भेष्वासाद्यकृष्णाजिनवस्त्राद्यादितंचस्थाप्यतत्रोपविश्यदेवपूजादिनारात्रिंजाग १८

14

त्रीति। ततः प्रतिपदि प्रातःकाले मुहूर्ते उत्थाय स्नानसंध्यां कृत्वा प्रातर्होमं च कृत्वा पौर्णमास्यां चेत्कृतं रात्रिदानं कृतं तदा आहो
पौर्णमासयागस्य दर्शस्थालीपाकवदेव कृत्वा ततो दर्शेष्टिमप्यपकृष्य कृत्वा वैश्वानरीं प्राजापत्यां च कुर्यात्। तत्र वैश्वानर्या
प्राजापत्याः समानतंत्रप्रयोगः। आचम्य प्राणानायम्य देशकालौ संकीर्त्य सत्न्याससहीकारं कदिष्यमाणः कल्लयामीहं प
र्णीगलेन विहितप्राजापत्येष्ट्या वैश्वानर्या समानतंत्रया यक्ष्ये। विष्णुर्दर्शि। विहिताएवाग्नयः। देवागस्तुवि ददृश्यादि पौर्ण
मासंतंत्रं बर्हिः सहत्स्यवत प्रवेशः। समरहनादि पात्राणि प्रसाजनादि प्रणीताप्रणयनांतं समानीवानस्यस्या सिदहायवेत्स्या
दि निर्वपणकाले अग्नये वैश्वानराय जुष्टं निर्वपामि अग्ने पुरोडाशं श्रपयीना। प्रजापतये जुष्टं चरुं श्रपयामि। विष्णवे जुष्टं निं। पु
रोडाशं श्रपयीना। आदित्याम्बा। अग्ने वैश्वानर हव्यं ८ रक्षस्व प्रजापते हव्यं ८ रक्षस्व विष्णो हव्यं ८ रक्षस्वेति। प्रोक्षणादि ह
विरासादनांतं समानं। होतरे हिंस्यादि पंचदशसामिधेन्यः। पंच प्रयाजाः। वार्त्रघ्नावाज्यभागौ। आज्यभागाभ्यामिष्ट्वा
अग्निनाय त्तस्य हवुष्मान्। सोमेनय त्तस्य हतुष्मान्। प्रधानस्य मध्यात्पूर्वार्द्धाद्विवराय अग्नये वैश्वानराय अनुब्रूहि।
वैश्वानरो यप्रतियेप्यामो यदीन्नलं ८ संगरोदेवता स एतान्यासायाजञ्च अवे दस्तनोनु चान्तु दुरितादवद्यो ॥ अग्निं

वैश्वानरं यज। ये ३ ऽग्निं वैश्वानरं वैश्वानरः पवयान्नः पवित्रैर्यत्संगमभिधावान्याशं। अनाज्ञातन्मनस्तायाउमा
नो यदत्रैनो ऽवत्सवामी ३ वौ०। अग्नये वैश्वानराये दं०। अग्नेर्वैश्वानरस्याहं देवयज्ययान्नादः। पश्वीवदवसा
य। प्रजापतयेनुब्रूहि। प्रजापतेन०व। यत्कामा०स्यिणो ३ प्रजापतिं यज। ये यजामहे प्रजापतिं सवेदपुत्रः पितरौ स
मानर्ड्सस्तनुर्भवित्स नवने सुर्मघः। सघापौर्णी दंतरिक्षं सस्तुवः सविश्वाउवौ अभवत्सत्रा भवाह्रौ०। प्रजापतय
इदं। प्रजापतेरहंन्नादः। पश्वीवदवसाय। विष्णवेनुब्रूहि। इदं विष्णु०रो ३। विष्णुं यज। ये०हे विष्णुस्त्रिर्देवः०मावौ०। वि
15 ष्णव इदं०। विष्णोरहं०न्नादः। नारिष्टान्हुत्वा। आज्याहुतीर्जुहोति। वैश्वानरो न ऊत्या प्रयातु परावतः। अग्निरुक्थे
न वाहसा स्वाहा। अग्नये वैश्वानराय इदं न मम इति त्यागः। १। एतावानं वैश्वानरमृतस्य ज्योतिषस्पतिं। अजस्रं घर्ममी
महे स्वाहा। २। वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः। उभा पितरा महयन्नजायताग्निर्द्यावापृ
थिवी भूरिरेतसा स्वाहा। ३। पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश। वैश्वानरः सहसा पृष्टो अ
ग्निः स नो दिवा स रिषः पातु नक्तं स्वाहा। ४। जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा। वैश्वानर ब्रह्मणे १५

विदंगातुंयजयंपातस्वस्तिभिःसदानःस्वाहा।५।त्वमग्नेशोचिषाशोशुचानआरोदसीअपृणाज्जायमानः।त्वंदेवानां॰अ
भिशस्तेरमुंचोवैश्वानरजातवेदोमहित्वास्वाहा।६।अस्माकमग्नेमघवत्सुधारयानामिक्षत्रमजरंसुवीर्यं।वयजये
मशतिनं॰सहस्रिणंवैश्वानरवाजमग्नेतवोतिभिःस्वाहा।७।वैश्वानरस्यसुमतौस्यामराजाहिकंभुवनानामभि
श्रीः।इतोजातोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्येणस्वाहा।८।अथैनमुपतिष्ठते।सहस्रशीर्षेत्यष्टादशाभिस्त्रिभिः।
अग्नयेस्विष्टकृतेनुब्रूहि।पिप्रीहिदेवां॰प्रें।अ।अग्निःस्विष्टकृतंयज।ययज्ञिंजग्नेवैश्वानरस्य॰प्रजापतेःपि॰।हूतोः
प्रियाधा॰इदेवाना॰वौ॰।इडाप्राशनं।चतुर्द्धाकरणं।धेनुर्दक्षिणां।सहस्रधारेत्नाक्षीयमाणादस्यांदिक्तयाधेन्या
त्तिराणिमस्यु।तकिशोषान्तश्रूस्या।अग्नेरग्ते दर्भस्तंबेषुयजभागंनिदधाति।अनुयाजादिसर्वंसमानं।इष्टिंसमाप्य।
सर्वोवैरुद्र॰सुपुरुषोवैरुद्रःसन्महो॰नमः।विश्वभूतं॰द।सर्वोह्येषरुद्रस्तस्मै।इतिद्वाभ्यामभ्यज्यसर्पिः।आयुर्दाअ
ग्नेहविषोजुषाणोघृतप्रतीकोघृतयोनिरेधि।घृतंपीत्वामधुचारुहव्यंपितेवपुत्रमभिरक्षतादिमां।इतिदर्भेणद
र्भस्तंबस्याहुतमोषाउपादायप्रस्तान्या।सहस्रशीर्षापुरुषइत्यनुवाकेनआस्याचम्यात्मानंप्रत्यभिमृश्यअथेतिब्रह्म

ओमितीदं सर्वं ओमित्येतदनुकृतिह स्म वा अप्यो श्रावयेत्याश्रावयन्ति। ओमिति सामानि गायन्ति। ओमिति ब्रह्मा
प्रसौति। ओमित्यग्निहोत्रमनुजानाति। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति ब्रह्मैवोपाप्नोति। इ
त्यनुवाकेन अग्निद्रव्यमग्नौ प्रक्षिप्यासन्यग्नीन्समारोपयेत्। अस्यामिष्टौ मन्त्रजपता श्रुतिः। आग्नेयीमेव कुर्याद्
ग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपति। प्राजापत्यं चरुं वैश्वदेवं नवकपालं चेति। अथवा केवलं प्राजा
16 पत्येष्टिः कर्तव्या तत्र हि प्राजापत्यश्चरुः पंचदश सामिधेन्यः। प्रजापतिरुपांशु। आवाहने प्रजापतिमावह। पंच
प्रयाजाः। व धन्वंतावाज्यभागौ। चरुसान्नाय्या जामेदृति। सान्नाय्यप्रतिनिधित्वेन चरो दर्शधर्मप्रयोग्यत्वात्। प्र
जापतयेऽनुब्रूहि। ओम् भूः स्वयंभूः प्रथममंतर्महत्यर्णवे। दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः। ओं प्रजापतिं यजा॥
ओं वः सुवरोंनू ये ३ प्रजापतिं प्रजापते० वा यस्कामास्ते० णां वौ०। प्रकृतिं स्विष्टकृत। उपहोमादिकं पूर्ववत्। सर्वं वेदसर
क्षिणा। अनुयाजादि सर्वं समानं। ब्राह्मणतर्पणं तामिष्टिं समाप्य अन्य सर्वेष्टिवत्। अथवा वैकस्मिन्केनत्रेधात ग०।०
वीनं तत्प्रयोगस्तु ब्रह्मत्नानं दपद्धताववगंतव्यः। अथ बोधायनानुसारी वैश्वानरो प्रयोगः। देशकालौ संकीर्त्य सन्या १६
द्वि१

सांगवैश्वानरेष्टि-अधिकारार्थं चयनमंत्राचमनमंत्रप्रोक्षणपुण्याहवाचनानि करिष्य इति संकल्प्या[illegible]विनोप
सांगवैश्वानरेष्ट्यार्त्विज्याधिकारार्थं वपनमंत्राचमनमंत्रप्रोक्षणानि करिष्य इति संकल्प्य यथाधिकारं तानि
कृत्वा यजमानो विहारं प्रविश्य गार्हपत्यस्य पश्चात् प्रागग्रेषु दर्भेषूपविश्य पवित्रपाणिः प्राङ्मुखः प्राणानायम्य जप
ति। याः पुरस्तात्प्रस्रवंति० मे। देवा गातुवि० [illegible]मता। अग्न एहि। सत्येन त्वा ह्वयामि। आकूत्यै त्वा० निविष्टं इत्यंतं जपित्वा
श्रीपरमेश्वरप्रीत्यर्थं संन्यासस्वीकारं करिष्यमाणः कृत्स्नशर्माहं पूर्वांगत्वेन विहितवैश्वानरेष्ट्या यक्ष्ये इति त्रिरुच्चै
र्वदेत्। ततस्तन्मस्त ध्यतामित्यादि। ऋत्विग्भिः ततस्त ध्यतामित्याद्युक्ते वदेत्। अथ वैश्वानरेष्टिसंबंधिहविः व्रीहि
मयः पुरोडाशद्रव्यं पंच प्रयाजाः। अग्नीषोमावाज्यभागौ वद्देवताप्रधानदेवताग्निर्वैश्वानरो द्वादशकपालः पुरोडाशः
अग्निस्विष्टकृदित्यादयो देवताः त्रयोनुयाजाः। सप्त पत्नीसंयाजाः प्रधानदेवतोच्चैः। पत्नीसंयाजाम[illegible]रेण ए
वमालंकेन सांगेन कर्मणा स घोपहृये। ऋत्विजो वृता अर्हं पित्वा अध्वर्युः इआजपं कृत्वा अन्वाधाय बर्हिराहरूपं
मौन
चदशसामिधेन्यः। यजव्रतग्रहणांते अध्वर्युर्गार्हपत्ये स्मार्तवदाज्यं संस्कृत्य स्रुवं कृत्वा निष्पन्नसंमृज्य स्रुचि चतु

गृहीतं गृहीत्वा आवनीयेसमिध्मना धायपर्युक्ष्य यजमानो ऽन्वारब्धः पृथिवी होता द्यौरध्वर्युः० इन्द्रियाय स्वा
हेति मन्त्रानुद्रुत्य स्वाहेति जुहोति। वाचस्पतये ब्रह्मण इदं०। अध्वर्युस्त्रुवेणाय देवाय ददिव्यमायुष्टे इति
त्रिभिरनुवाकैः प्रत्यृचं जुहुयात्। ततो यजमानः समित्पाणिस्तिष्ठन् वैश्वानराये सुपस्थाय वरदानं तं कुर्यात्। अ
ध्वर्युश्चतुर्गृहीतं गृहीत्वा पूर्णां पश्चाहुतप्र० पतां० अग्नीषोमौ प्रथम० [illegible] स्वाहेति जुहुयात्। यजमानः। पौर्णमा
साये इदं०। निवेशनी संगमनी० धाना। यत्ते देवा अदधु० वीर्यै स्वाहेति जुहुयात्। यजमानः। अमावास्याया इदं०। त
तः पात्रीसंमर्शनादि। पात्रासादने [illegible] निष्क्रतिवत्। निर्वपणे देवस्य त्वा० अग्नये वैश्वानराय
जुष्टं नि०। देवस्य त्वा० अग्नये वैश्वानराय वो जुष्टं०। प्रोक्ष्य० अग्नये वैश्वानराय जुष्टमधिवपामि सधिवासये। द्वाद
शकपालान्युपधाय अग्नये वैश्वानराय त्वा इत्यभिमर्शने। आप्यायतां घृ० अग्नये वैश्वानराय जुष्टमभिघा
रयामि। होतरेहि स्यादि। आज्यभागाविष्ट्वा। अग्नये वैश्वानरायानुब्रूहि। होता वैश्वानराय प्रतिवेदयामो० देवं यो॥ गण०
अग्निं वैश्वानरं यजा। ये० अग्निर्वैश्वानरः पवमानः पवित्रे० सुवासीतैस्यौ०। अग्नये वैश्वानरायेदं०। अग्ने वैश्वानरस्त्वा १७

हं देवयज्यान्नादो भूयासं। स्विष्टकृतमवदाय स्रुवेणाज्यस्थाल्या आज्यं प्रस्राकृतिं गृहीत्वा प्रस्रचमष्टावाज्याहुतीर्
जुहोति। वैश्वानरो न ऊ० अग्नि० हसा स्वाहा। अग्नये वैश्वानराय इदमिति सर्वत्र त्यागः।१। ऋतावानं० हे स्वाहा।२।
वैश्वानरस्य सुम० स० तसा स्वाहा।३। पृष्टो दिवि० नक्तं० स्वाहा।४। जातो यदग्ने० नसा स्वाहा।५। त्वमग्ने शोचिषा० हिन्वा स्वा
हा।६। अस्माकमग्ने० तिनि०।७। वैश्वानरस्य सु० यैण स्वाहा।८। अथैनमुपतिष्ठते सहस्रशीर्ष इत्यष्टाभिर्ऋग्भिः। ततो
ध्रुवं स्रुक्स्थाली ध्रुवाज्यं कृत्वा० प्राक्रम्य वर्ड श्रावयेति अग्नि० स्विष्टकृतं यजेत्यादि। होता प्रकृतौ संयाज्याद्युलोपश्चानं चतुर्द्धी
करणकाले नात्र चतुर्द्धीकरणं। आहवनीयाग्रे दर्भस्तंबेषु हुतशेषं निधानं बलादेव हेतोः श्चतुर्द्धीकरणनिवृत्तिः। इडाप्रा
शनादि दक्षिणाकाले अन्वाहार्यं धेनुं च आसाद्य ऋत्विजः अग्नये वर्द्धनो धेनुं च यथाभागं प्रतिगृह्णीध्वं। त्वष्टि० देवस्य त्वा प्र
तिगृह्णामि देवि दक्षिणे ब्रह्मणे इदं न कृषयगां ताभ्याम् तत्समर्थ्यां ऊह्यसयं सेतद्वि कृषिष्ठं जघनेनाग्न्य न्वाहार्यं च। एत
स्मिन्काले हविःशेषमाहवनीयस्याग्रे दर्भस्तंबेषु निदधाति। ब्रह्मन्प्रस्थास्याम इत्यादि सर्वं समानं। इष्टिं स वै वै कृ० विश्वं म
तमिति द्वाभ्यामन्वन्यस्य अग्नि०। आयुर्दा अग्ने० दिममिति मंत्रेण दर्भस्तंबस्थाहुतशेषालिं चिदाशपप्रत्नाल्य सहस्रशीर्ष स्यु
वाकेन प्राश्य आचम्य आसानं प्रत्यभिमृश्य। आपस्तंबस्तं चानसारो वैश्वानरे इष्टिर्लिखित इति ब्रह्मे स्युवाकेन दर्भस्तंब

स्यकृतशेषमाज्यवत्। यमस्त्विष्यामन्यग्नीन्समारोपयेदिति वैश्वानरेष्टिः। अथ प्राजापत्यः। पूर्ववत्त्रिरुपांशु त्रिरुच्चैः
प्राजापत्येष्ट्या यक्ष्ये इति संकल्प्य प्राजापत्येष्टिसंबंधिहविः। अग्नीषोमाविष्ण्वादि प्राजापत्यो व्रीहिमयश्चरुः उपांशु
स्विष्टकृद्वारयोर्देवता इत्यादि। प्रकृतिवदिध्माबर्हिषी। आहत्य व्रतग्रहणांते अध्वर्युः पूर्ववदाज्यसंस्कारस्य चतुर्होता
कूष्मांडहोम सारस्वतहोमौ कृत्वा पाणिसंमर्शनादि पात्रासादने स्थाल्य चरुस्थालीं त्रिः प्रक्षाल्य सह चरुमेक्षणमिति शम्या
दृषदुपलवर्ममितराणि प्रकृतिवत्। निर्वापे देव० प्रजापतये जुष्टं नि० प्रजापतये जु० प्रोक्षणकाले अग्नादेवयजनं वहेत्यंगा
रं निधाय तदुपरि तिरःपवित्रमानीत प्रणीतोदकां चरुस्थालीं श्रवाम्नी त्यधिश्रित्य एनामंगारैः परिचिनोति निर्दग्ध
ं रक्ष इति। अभिमर्शने प्रजापतये वः घर्मोऽस्य विश्वायुष इति तंडुलानावपति। आप्यायतां० तत्सा प्रजापतये जुष्ट
मभिघारयामि उद्वासयति शृतश्चरुस्नानि० नो। आज्येन संतर्पयति। आर्द्रः प्रथस्नुर्भु० प्रजापतये उपांशु। अनुब्रू
हीत्युच्चैः होतारमुक्षुः स्वयंभूः० पतिः ऊर्मित्युच्चैः। प्रजापतिं० यजेत्युच्चैः प्रजापतेरन० पीणां उपांशु। वौ३षडित्युच्चैः। प्रजापतय
इदं० प्रजापतिं० यजेत्युच्चैः। प्रजापतेर० पीणां उ० वौ३षडित्युच्चैः। प्रजापतय इदं० प्रजापतेरहं देवयज्यया प्रजनया वं पशु
मिपश्वभिश्च नन्निषीय। प्रकृतिवत्स्विष्टकृत् स्विष्टकृद्यागे चरुमेक्षणमग्नावनुप्रहृत्याज्यशेषेणाभिघारयति। अन्वा १८

18

हार्यमासाद्यसर्ववेदसदक्षिणार्थंयथाशक्ति हिरण्यं च निधाय ब्रह्मणउद्दनं हिरण्यं अग्नये ताभ्याम तत्त्वमस्यामीत्यादि।
उद्धासयं त्येतद्धविःशेषमाहवनीयस्याग्रेदर्भस्तंबेषु निधाय ब्रह्मन्प्रस्थास्यामइत्यादि उक्तितवाचनेप्रजापतेरहदक्षि
तिमन्त्रजपमित्यादि इष्टिंसमाप्य सर्वोवै विश्वंभूतमिति द्वाभ्यामग्निमार्जनेन विशेषमहत्वान्तं प्रवर्तते। अग्निरुच्यमग्नोस्त्रेपां
तं च। इतिप्राजापत्येष्टिः। एवंप्राजापत्याद्यन्यतमामिष्टिंकृत्वा अर्द्धधानिन्नार्थं पासनाग्नौ सर्वाधानिनादक्षिणाग्नौ प्राणादिभिं
त्रहोमपूर्वकं विरजाहोमं एकपक्षेक्रहोमं च अनाहिताग्नि लिखितप्रयोगतदंगदक्षिणादानांतं कृत्वा अर्द्धधानिनउर्ध्वपास
नाग्नेः संमासिंचं त्विति उपस्थानंकुर्यात्। संमासिंचंतुमरुतः समिंद्रः संबृहस्पतिः। संमायमग्निः सिंचत्वायुषा च बलेन चायु
ष्मंतं करोतु माभिरुपस्थाय सर्वाधानिनाम्न्ययानिपात्राणि अग्नौ प्रक्षिप्य तेजसान्मृण्मयं वेदत्वा अस्माद्वै समजायथा अयं
त्वदधिजायतामसौ स्वर्गाय लोकाय स्वाहेतिमंत्रेणाहवनीये अरणीं मुसलोलूखलं व्यतिरिक्तपात्राणि दहेत्। ततः समा
रोपमाहैसम्यग्घस्तं प्रताप्य। अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आसीदाथा नो वर्द्धया गिरः। या ते अग्ने य
ज्ञियातनूस्तयेह्यारोहात्मात्मानमच्छावसूनि कृण्वन्नस्मे नर्या पुरूणि यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आजा
यमानः सक्षय एहि इतिमंत्रद्वयं त्रिः पठित्वा आत्मनो मुखमध्ये कुष्मापध्मागवत्ति तथा आहवनीयाग्निं समारोपयेत्। अग्निजा

।ॐ प्राश्नीयादिति ब्रह्मलोनं धृये। ततः स्वर्गाख्यं विश्वतोमुखं वैश्वानरं ध्यात्वा अयमग्निर्गृहपतिः गार्हपत्यः प्रजाया वसु
वित्तमः। अग्ने गृहपते अभिद्युम्नमभिसह आयच्छस्व स्वाहेति मंत्रेण गार्हपत्ये अरणी प्रक्षिप्य अयंतेयोनिर्ऋतीये अग्नेति
मंत्रद्वयं त्रिः पठित्वा पूर्ववद्गार्हपत्यं समारोप्य भूः स्वं विश्वतोमुखं वैश्वानरं ध्यात्वा अयमग्निः पुरीष्यो रयिमान्पु
ष्टिवर्द्धनः। अग्ने पुरीष्याभि द्युम्नमभिसह आयच्छस्व स्वाहेति मंत्रेण दक्षिणाग्नौ मुख्यप्रत्योलखले हुत्वा पूर्ववन्मंत्रद्व
यं त्रिरावर्त्तनोक्त पूर्ववद्दक्षिणाग्निं समारोप्य अंतरिक्षाख्यमव्ययं वैश्वानरं ध्यायेत्। ततो गार्हपत्यं गत्वा पौरुषं
त्वा वेद्यां मध्ये क्षित्वा कोसि को नाम कस्मै त्वा काय त्वेति यजुर्जपित्वा अरणी धानी पुनः सेपासनांतिकमागत्य पात्रद्वा
दशकं त्वा उक्तमंत्राभ्यां उक्तवत्समारोप्य हस्तौ प्रताप्य आचम्य ॐ एह्यग्ने सहेष्टापूर्त्तैः शरीरमनु संचरस्व। नाहं त्वाम
पहाय परां गमां त्वमपहाय परां गाः इति मंत्रेणोपस्तनाग्निं विसृज्य पुनराहवनीयदेशं गत्वा अग्ने यः संभृत इत्यादि
सप्तु पतिष्ठेत्। ततः कौपीनकटिसूत्रवस्त्रकंथादंडाजिनमुपयोग्यं चेत्पादुकापि गृहीत्वा संन्यासिनामाचारात्कमंड
लुं परिगृह्य लौकिका जितं चाप्य पुत्रसनारायणेन गृहान्निष्क्रम्य जलाशयं गत्वा स्वेभ्यः पुत्रेभ्यः आशिषं दत्त्वेत्यादि गला
गुरूपसदनांतं पूर्वं लिखितानाहिताग्निप्रयोगवत्सर्वं कुर्यात्। इति त्रेताग्निकर्तृकं प्रयोगः। इदानीं केवलस्नातक १९

19

निरग्निकं प्रतिग्रहणान्वाधानविरजाहोमादिवर्जितः प्रायः कपिलप्रोक्तप्रयोग उच्यते॥ निरग्निकः कर्ता उक्तकाले
उक्तप्रकारेण प्रायश्चित्तं कृत्वा अष्टौ श्राद्धानि [illegible] कृत्वा तद्दिने दिनांतरे वा मुंडनं विधाय दंडसंस्कारमपि विधाय पुण्याया
हरित्रयं कृत्वा ब्रह्मांजलिं विधाय ब्रह्मणे नमः इत्यादिमंत्राणां मानसजपादि त्रिंशत्प्राणायामांतं कृत्वा उपवाससंकल्पस्नानादि
त्रीप्रवेशौ कृत्वा सायंसंध्यामुपास्य कौपीनाद्युपयुक्तपदार्थसन्निधानं कृत्वा विधिमुमभ्यर्च्य उपवासी ब्रह्मभावेन स्थि-
तः सन् एतां रात्रौ जागर्तीति॥ ततः प्रातरुत्थाय स्नात्वा प्रातःसंध्यावंदनांते कौपीनादिपदार्थयुक्तो नघादोग
त्वा देवर्षिपितृतर्पणं च कृत्वा बंधुविसर्जनादि कृत्वा अभयप्रदानांतं कृत्वा यमलिंगविरुद्धं कर्मेत्यादि प्रैषपठ-
न पूर्वकं तदुक्तपदार्थत्यागानंतरं शुद्धदिशावलोकनं आदित्यश्चंद्रश्च जितिल इत्यादि प्रार्थनादि प्रैषोच्चारणांतं
कृत्वा अभयं सर्वभूतेभ्यः इति पुनरभयं दत्वा शिखीसूत्रापितके शेलापनादि दंडकमंडलुग्रहणांतं कृत्वा दंडादि
युक्तः समित्पाणिर्गुरुमुखात् प्रणवोपदेशसंपादनादि तदर्थसंपादनार्थं सर्वमाचार्यमुखे नैव पंचीकृतपंचमहा-
भूतेत्यादिनास्वशाखावाक्योपदेशपूर्वकं कुर्यादिति केवलं निरग्निकं प्रति प्रायः कपिलप्रोक्तप्रणवोपदेशप्रयोगः॥

20

सन्यासयोग्यतार्थं कृच्छ्रादि संकल्प्य दत्वा। देशकालौ संकीर्त्य अमुकगोत्रस्य अमुकशर्मणः मम करिष्यमाण
सन्यासयोग्यतासिध्यर्थं चतुःकृच्छ्रात्मकप्रायश्चित्तप्रतिकृच्छ्रमेकैकगोनिष्क्रयद्रव्यद्वारा अहमाचरिष्ये
इति संकल्प्य पूर्वकं ब्राह्मणेभ्यो दत्वा। पुनर्देशकालौ संकीर्त्य ६

श्रीगणेशाय नमः॥ अथातुरसंन्यासो निरूप्यते सन्यासे सर्वत्र स्वशरीरव्यतिरिक्तं सर्वं त्यजन्सन्यासाश्रमं गमिष्या
मीति संकल्प्य प्रैषोच्चारणाभयदानानीति त्रितयं प्रधानं। अन्यो नांदीमुखादिदंडग्रहणांतक्रमकलापः सन्यासेवां
गं। अतएवातुरसन्यासे संकल्प्य प्रैषोक्त्यभयदानात्मकं अंगं स्मर्यते। यद्यातुरः स्यान्मनसा वा वाचा वा सन्यसेदेषपं
था ब्राह्मणाहानुविक्तः तेनेति सन्यासी ब्रह्मविदेव भवेति भगवन्निति। आतुराणां सन्यासेन विधिर्नैव च क्रिया। प्रैष
मात्रं समुच्चार्य सन्यासं तत्र पूरयेदिति प्रैषमात्रं कर्मत्रितयमिति यावत्। आंगिरसोक्तप्रकारेण प्रत्याजित
प्राणिः शुद्धवस्त्रं संधार्य मंत्रस्नानं कृत्वा निरतिशयानंदावाप्तये परमहंसाश्रमाधिकारसिध्यर्थमातुर
विधिना सन्यासमहं करिष्य इति संकल्प्य। ब्राह्मणानुज्ञया शिखायाः पंच सप्त वा केशान्स्थापयित्वा शिष्टान्केश
श्मश्रुनखादीन्वापयेत्। ततः स्नात्वा संध्यादितर्पणादिकं कृत्वोपासनं कृत्वा आत्मन्यग्निं समारोप्य आहिताग्निश्चे गण०
दात्मा अपस्वेष्टिस्थानेप्राणकुंतिकं त्वा श्रौताग्निसमारोप्य सन्यसेत्। विधुरब्रह्म[illegible]री स्नातकानामग्नेरभावादारोपो २०
नास्ति उत्सृष्टाग्न्यनुगताग्नीनामाधानकालासंभवात् समारोपो नास्ति स[illegible]खेलु कर्तव्यमेव। ततोऽपाम[illegible]पंगत्वा

तद्यथा। ॐ भूः सावित्रीं प्रविशामि। तत्सवितुर्वरेण्यं। ॐ भुवः सावित्रीं प्रविशामि। भर्गो देवस्य धीमहि। ॐ स्वः सावित्रीं प्रविशामि। धियो योनः प्रचोदयात्। ॐ भूर्भुवः स्वः सावित्रीं प्रविशामि। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। इति जपित्वा ५

या

पउद्धृत्य पात्रे कृत्वा तोयमादाय सुजुहोति। एष ह वा अग्नेर्योनिर्यः प्राणं गच्छ स्वां योनिं गच्छ स्वाहेति प्रथमाहुतिः। आपो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वाहेति द्वितीयाहुतिः। ततः पात्रस्थं हुतशेषं तोयमाश्रुः शिरसानद्वस्यनुवाकेनाग्निमं त्र्य पुत्रैषणा वित्तैषणा लोकैषणा मया त्यक्ता स्वाहेति तदुदकं हस्तेनादाय पिबेत्। अभयं सर्वभूतेभ्यो मत्तः स्वाहेति द्वितीयं पिबेत्। संन्यस्तं मया स्वाहेति निःशेषं पात्रस्थमुदकं हस्तेनादाय पिबेत्। ततो गायत्रीं व्याहृतौ प्रवेश्य व्याहृतिं प्रणवे प्रवेशयेत्। ततोन्यत्सवित्रं जलमंजलिपूर्णमादाय प्राच्यां दिशि दक्षिणस्यां प्रतीच्यामुदीच्यामूर्ध्वायां च दिशि दिशि प्रत्येकं निनयेत्। ततः सूर्याभिमुख ऊर्ध्वबाहुः प्रेषमुच्चारयेत्। ॐ भूः संन्यस्तं मया ॐ भुवः संन्यस्तं मया ॐ स्वः संन्यस्तं मयेति उपांशुमध्यमोच्चस्वरेण त्रिर्ब्रूयात्। ततो अभयं सर्वभूतेभ्यो मत्तः स्वाहेति प्राच्यां दिशि ह्युदकांजलिं निनयेत्। ततः शिखां शिरसा निकृत्य विसृज्य यज्ञोपवीतं चाच्छिद्य जलमप्युदकांजलिनासह गृहीत्वा ॐ भूः स्वाहेत्यप्सु जुहुयात्। तत ऊर्ध्वं पुत्रगृहं न गच्छेत्। अत्यंतमातुरश्चेत्प्रैषमात्रं वा वदेत्। जीवति चेत्स्वस्थः सन्महावाक्योपदेशार्थं सद्गुरुमुपसाद्य महावाक्योपदेशं लब्ध्वा क्रमसंन्यासविधिमुक्ता चारेणावर्तेत। मुमंतुनोक्तात्। अथातुरसंन्यासप्रकारस्तु देशकालौ संकीर्त्य संन्यासं करिष्ये संन्यस्तोहं संन्यस्तोहं संन्यस्तोहमिति मंदमध्यमोच्चस्वरेण त्रिर्ब्रूयादिति ॥

सन्यासिनश्च स्पर्शेन निष्पापो जायते नरः। नत्वा च कामतो दृष्ट्वा राजसूयफलं लभेत्।१। ब्रह्मवैवर्त्ते कृष्णजन्मखंडे।

तदुपदेशं विना तदानीमेव मरणे यतिसंस्कारविधिनैव संस्कारं नारायणबलिपार्वणाराधनादि कुर्यात्
इत्यातुरसन्यासप्रकारः। अत्र मूलवचनानि। आतुराणां विशेषोस्ति न विधिर्नैव च क्रिया। प्रैषमात्रं तु सं
न्यास आतुराणां विधीयते। गत्वोदकसमीपं तु पात्रयोरप उद्धरेत्। तयोरेकं करेणाथ गृहीत्वा दक्षिणेन वै।
अप्स्वेष लेप इत्यादिमंत्राभ्यां जुहुयात्सुधीः। कृत्वाहुतीः स्वयं पश्चात्पात्रस्थाहुतिशेषकं। आप्तः शिष्यो
वृषभो नु वाके नाभिमंत्रयेत्। पुत्रेणातिमंत्रेणैतज्जुहो वापि पिबेज्जलं। द्वितीयमन्नयं सर्वेत्येवमुक्त्वा
पिबेद्द्विजः। ॐ भूर्भुवः सुवरिति पिबेच्छेषं नमोवयेत्। आहायांजलिना तोयमन्यस्मिन्दिशं क्षिपेत्। आ
दित्याभिमुखो भूत्वा चोर्द्धबाहुरतंद्रितः। सन्यस्तोहमिमं मंत्रं त्रिर्वारमभ्यसेद्बुधः। ततः परं गृहबंधन्नग
केड्रिन्तुको भवेत्। मृते तु प्रक्षिपेद्भूमावुदके वा यथाविधिः। सोमयाजी भवेत्साग्निः आपत्यां वैश्वानरी तथा। त्रेधा
तवीयामिष्ट्वा वा सर्ववेदसदक्षिणां। अध्वराक्तो भवेदाहवनीये जुहुयाद्बुधः। देवतायै प्रधानायै पूर्णाहुति ग०ा० २१
मनुत्तमां। असौ स्वर्गाय लोकाय स्वाहेति जलयेत्ततः। पात्राणामन्यमयानां तु प्रक्षेपोप्सु विधीयते। अयं ते

21

योनिद्वयाभ्यामात्मन्यग्नीन्समारोपयेत् । ततआतुरसंन्यासंकुर्यात्सर्वविधानतः । उक्तआतुरसंन्यासः अथलोकांगि
रसोमतः । आंगिरसीये आतुरसंन्यासप्रकारः । आषाढपौर्णमास्यां व्यासपूजोक्ता । तत्रत्रिमुहूर्तांचेत्परेवग्राह्या ।
व्यासपूजांप्रवक्ष्यामिसम्यक्तांवित्तसिद्धये । कृत्वातुस्नानमापाद्य व्यासपूजांगसन्निधापयेत् । प्राणायामत्रयंकृत्वा
षडंगन्यासपूर्वकं । व्यासपूजांकरिष्यामीत्युक्त्वातुसलिलंक्षिपेत् । तत्रप्रयोगः । प्रातःकृतनित्यक्रियागंगादौस्नानंकृ
त्वाव्यासपूजास्थानमागत्य गोमयोपलिप्तभूमौसर्वतोभद्रंविरच्यतत्पश्चिमदेशेआसनंन्यस्य । मुमुक्षुरवश्येत्या
दिदेशकालौसंकीर्त्य व्यासपूजांकरिष्यइतिसंकल्प्य प्राणानायम्यास्मन्नेदिग्बंधादिप्राणन्यस्यतत्त्वादिषडंगध्या
नंचपुरुषसूक्तेनस्वशरीरेन्यासंकृत्वाकलशाराधनंशंखार्चनंविधायशंखोदकेनपूजाद्रव्यमात्मानंचप्रोक्ष्यस
र्वतोभद्रेतंडुलपुंजोपरिदेवतावाहनंकुर्यात् । तद्यथा मध्येॐब्रह्मणेनमः ब्रह्माणमावाहयामि । १ एवंमन्त्रेपि । उत्तरेसो
माय॰२ ईशाने ईशानाय॰३ पूर्वेइंद्राय॰४ आग्नेयेअग्नये॰५ दक्षिणेयमाय॰६ नैर्ऋत्येनिर्ऋतये॰७ पश्चिमेवरुणा
य॰८ वायव्येवायवे॰९ वायुसोममध्ये अष्टवसुभ्यो॰१० सोमेशानमध्येएकादशरुद्रेभ्यो॰११ ईशानेंद्रमध्येद्वादशा

22

दिक्सेभ्यो०१२।इंद्राग्निमध्ये अश्विभ्यां०१३।अग्नियममध्ये विश्वेभ्योदेवेभ्यः क्षपेत्तकेभ्यो०१४।विष्वांदे
वान्क्षपेत्तकानावा०१५।यमनिर्ऋतिमध्ये सप्तपत्तेभ्यो०१६।निर्ऋतिवरुणमध्ये भूतनागेभ्योनमः०१७।
वरुणवायुमध्ये गंधर्वाप्सरेभ्यो०१८।ब्रह्मसोममध्ये स्कंदाय०१९।रूपभाय०२०।शूलमहाकालाभ्यां०२१
ब्रह्माग्निमध्ये दक्षादि सप्तगणेभ्यो०२२।ब्रह्मेंद्रमध्ये दुर्गायै०।२३।विष्णवे०२४।ब्रह्माग्निमध्ये स्वधायै०२५।
ब्रह्मयममध्ये मृत्युरोगेभ्यो०२६।ब्रह्मनिर्ऋत्योर्मध्ये गणपतये०२७।ब्रह्मवरुणयोर्मध्ये अद्भ्यो०२८।अप
आवाप्य।ब्रह्मवायुमध्ये मरुद्भ्योनमः।मरुत आ०२९।ब्रह्मणः पादमूले कालिकाधः पृथिव्यै०३०।तत्रैव स
प्तसागरेभ्यो०३१।गंगादिसप्तसरिद्भ्यो०।३२।मेरवे नं०३३।ब्रह्मपरिधौ सोमादिसन्निधौ क्रमेणायुधावा
हनं।गदायै०३४।त्रिशूलाय०३५।वज्राय०३६।शक्तये०३७।दंडाय०३८।खड्गाय०३९।पाशाय०४०।अंकुशा
य०४१।तद्बाह्ये उत्तरादि।गौतमाय०४२।भरद्वाजाय०४३।विश्वामित्राय०४४।कश्यपाय०४५।जमदग्नये०४६। ग०।०
वसिष्ठाय०४७।अत्रये०४८।अरुंधत्यै०४९।तद्बहिः पूर्वादि दिक्षु ऐंद्र्यै०५०।कौमार्यै०५१।ब्राह्म्यै०५२।वाराह्यै०५३। २२

चामुंडायै॰५३।वैष्णव्यै॰।५४।माहेश्वर्यै॰५५।वैनायक्यै॰५६।इति षट्पंचाशद्देवताः सर्वतोभद्रे पूज्याः।सर्वतोभद्र
पीठदेवताभ्यो नमः।गंधं समर्पयामि पुष्पं॰।धूपं॰दीपं॰नैवेद्यं॰फलं॰तांबूलं॰दक्षिणां॰इति संपूज्य तत्र मध्ये
महीद्यौरित्यादि कलशोपरि पूर्णपात्रं निधाय तत्र वरुणमावाह्य संपूज्य पूर्णपात्रोपरि वस्त्रे गंधेन द्वादशारं लिखेत्।
यथा।मध्ये त्रिकोणं तद्बहिः षट्कोणं तद्बहिर्वृत्तं तत्कर्णिका तद्बहिरष्टौ दलानि प्रति दलाग्रे द्वादश आरान्
यवाकारान् कुर्यात्।तद्बहिश्चतुर्द्वारं चतुरस्रं विलिखेत्व्य त्रिकोणषट्कोणात्मकरत्नरूपकर्णिकामांकलमं
चक्रं तत्र वा घटदलेषु अष्टौ पंचकानीति पुनर्दशांकजौ संक्रीत्येषु चित्रतिपदमानन्य प्रोष्ठपदीपर्यंतं यावच्च
तुरो मासांश्च मावर्षिं अंडजोद्भिज्यादि बहुप्राणसंकुलितमार्गयात्रानिवृत्त्यर्थं श्रीकृष्णव्यासाद्यैर्यादी
नां सन्निधानस्थित्यर्थं भिक्षाटनाद्यविलागमनागमनदोषनिवृत्त्यर्थं व्यासोक्तविधानेन सकलदेवतास्थाप
नपूजाद्यहं करिष्ये।तत्र पीठद्वादशारे मध्ये कर्णिकायां ॐ आधारशक्त्यै॰।ॐ कूर्माय॰।ॐ अनंताय॰ॐ पृथिव्यै॰
ह्रीं क्षीरसागराय॰।श्वेतद्वीपाय॰।मंमणिमंडपाय॰।कंकल्पवृक्षेभ्यो॰।रंरत्नवेदिकायै॰।रंरत्नसिंहासनाय॰।सं

कुं २

सर्वशक्तिकमलासनाय०पीठकोणेषु आग्नेयेगंगणपतये०गणपतिंआवाहयामीतिसर्वत्र०नैरृत्येसंसरस्व
त्यै०वायव्येदुंदुर्गायै०ईशान्येक्षेंक्षेत्रपालाय०कूर्म्मपंचकस्याग्नेयेब्रह्मणे०पीठमध्येमूलमंत्रेणाकूर्म्माय०कू
र्म्ममावाहयामीतिमध्ये।पूर्वेवासुदेवाय०दक्षिणेसंकर्षणाय०पश्चिमेप्रद्युम्नाय०उत्तरेअनिरुद्धाय०कूर्म्म
पंचकस्यदक्षिणेमध्येवेदव्यासाय०पूर्वेवैशंपायनाय०दक्षिणेसुमंतवे०पश्चिमेजैमिनये०उत्तरेपैलाय०
कूर्म्मपंचकस्योत्तरे।मध्येशंकराचार्येभ्यो०शंकराचार्यानावाहयामि।पूर्वेविश्वरूपपदाचार्येभ्योनमः।दक्षि
णेपद्मपदाचार्येभ्यो०पश्चिमेहस्तामलकाचार्येभ्यो०उत्तरेत्रोटकाचार्ये०कूर्म्मपंचकस्यपश्चिमेमध्येसनकाय०
पूर्वेसनंदनाय०दक्षिणेसनातनाय०पश्चिमेसनत्कुमाराय०उत्तरेकपिलाय०कूर्म्मपंचकस्यनैरृत्येमध्येऋ
षभाय०पूर्वेदत्तात्रेयाय०दक्षिणेशुकाय०पश्चिमेनारदाय०उत्तरेसंवर्त्ताय०कूर्म्मपंचकस्यवायव्येमध्ये
श्वेतकेतवे०श्वेतकेतुं।पूर्वेदुर्वाससे०दक्षिणेजडभरताय०पश्चिमेरैवता०उत्तरेनामदेवाय०कूर्म्मपंचकस्यपूर्वे
मध्येद्रविडाचार्येभ्यो०पूर्वेगोविंदभगवत्पूज्यपादाचार्येभ्यो०गोविंदभगवत्पूज्यपादाचार्यान०दक्षिणेगौडपा २३

23

दाचार्येभ्यो नमः। पश्चिमे विवरणाचार्येभ्यो० उत्तरे समस्तविद्याप्रवर्त्तकाचार्येभ्यो० कुलपंचकस्याग्नेये। मध्ये गुरु
भ्यो०। पूर्वे परम गुरुभ्यो०। दक्षिणे परमेष्ठीगुरुभ्यो०। पश्चिमे परात्परगुरुभ्यो०। उत्तरे समस्तब्रह्मविद्यासंप्रदायिभ्यो०
समस्तब्रह्मविद्यासंप्रदायीनावा०। कुलपंचकस्य ईशाने। मध्ये आत्मने०। आत्मानमावा०। पूर्वे अंतरात्मने०। दक्षिणे
परमात्मने०। पश्चिमे सर्वात्मने०। उत्तरे परब्रह्मणे०। परब्रह्मावाह०। ततो दिक्षु प्रागादि लोकपालावाहनं। इंद्राय।
अग्नये०। यमाय०। निर्ऋतये०। वरुणाय। वायवे०। सोमाय०। ईशानाय०। पूर्वमध्ये ब्रह्मणे०। निर्ऋति वरुणयोर्मध्ये
अनंताय। इत्यावाह्य। पुरुषसूक्तेन षोडशोपचारैः संपूज्य स्तुत्वा नमेत्। पुष्पांजलिं वक्ष्यमाणमंत्रैर्दद्यात्। कुल
पंचके। लक्ष्मीकलत्रं शतपत्रनेत्रं पूर्णेन्दुवक्त्रं पुरुहूतमित्रं। कारुण्यपात्रं कमनीयगात्रं वंदे पवित्रं वसुदेवपुत्रं॥१॥
नमस्ते वासुदेवाय शुद्धबुद्धस्वरूपिणे। हिरण्यरेतसे तेभ्यं प्राधान्यं व्यक्तरूपिणं॥२॥ नमोस्त्वनंताय सहस्रमूर्त्त
ये सहस्रपादाक्षिशिरोरुबाहवे। सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः॥३॥ कामरूपं कलावं
तं कामिनीकामदं प्रभुं। मन्मथं मथुरानाथं प्रद्युम्नं प्रणमाम्यहं॥४॥ अनिरुद्धं महोदारं कामिनं सुंदरं प्रियं। नमाम्य

हं भयपलेशं फुल्लेंदीवरलोचनं ।१। व्यासपंचकस्य । वेदव्यासस्वात्मरूपं संन्यसंधपरायणं । जितेंद्रियं जितक्रोधं
सशिष्यं प्रणमाम्यहं ।३। आचार्यपंचकस्य । सर्वशास्त्रार्थतत्त्वज्ञं परमानंदस्वरूपिणं । ब्रह्मण्यं शंकराचार्यं प्र
णमामि विवेकिनं ।१। परात्परतरं शांतं योगींद्रं योगिसेवितं । जितेंद्रियं जितक्रोधं सशिष्यं प्रणमाम्यहं ।२। स्वा
सने स्थित्वा नियमप्रार्थनां कुर्यात् । मा धनश्चतुरो मासांस्सर्वभूतहितायवै । स्वापं यास्यति रोषांके लक्ष्मीसहित
गत्पते । सुप्तश्चैवोत्थिता यावत् भवेद्यावत्सनातनः । अहं च तावत्स्थास्यामि सर्वभूतहिताय च । प्रायेण प्रावृषि
प्राणिसंकुलं वर्म दृश्यते । अतस्तेषामहिंसार्थं पक्षान्वै श्रुतिसंश्रकान् । स्थास्यामि चतुरो मासान्नेवा सति
बाधके । चतुरो यं वसेन्मासान् द्वौ वा कौषिकवार्षिकौ । वार्षिकांश्चतुरो मासान्विहरेन्न यतिः क्वचित् । बीजां
कुराणां जीवानां हिंसा तत्र यतो भवेत् । अंडजैरुद्भिज्जैर्वापि प्राणिभिर्दृश्यते मही । स्वेदजैर्व्यर्थकैस्तथान्यैश्च नी
नारूपैः समंततः । एतेषां रक्षणार्थाय आषाढ्यां निवसाम्यहं । उक्तवंतमिति ब्रूयुः पार्श्वस्थाये द्विजोत्तमाः । निव
संतसुखेनात्र गमिष्यामः सदा मुदा । चातुर्मास्यं यतीनां तपः कार यतिधर्मवित् । सर्वतीर्थेषु यत्नेष्वेवं सर्वदा रे २४

उपत्फलं तत्सर्वं लभतेमर्त्य आषाढ्यां विष्णुपूजनादिति। शेषपर्यंकशय्ये स्मिन्फणामणिगणान्विते। श्वेतद्वीपांतरे
देवकुरु निद्रां जगत्पते। सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदं। विबुद्धे च विबुद्धं तत्प्रसन्नो मे भवाच्युत। इति प्रार्थ
ना। श्वेतद्वीपे भोगिनाथे योगिनाथे स्थिते त्वयि। चातुर्मास्यव्रतेनुज्ञां देहि लक्ष्मीपते मम। चतुरो वार्षिकान्मासान्देव
स्योत्थापनावधि। इमं करिष्ये नियमं निर्विघ्नं कुरु मेच्युत। इदं व्रतं मया देव गृहीतं पुरतस्तव। निर्विघ्नां सिद्धिमायाया
तु प्रसादात्तेरमापते। नियमः। सीमोल्लंघनमक्षौरं न घुल्लंघनमेव च। एकभोक्तानकर्तव्या कंबलं व्रतमाचरेत्। गृही
तेस्मिन्व्रते देव पंचत्वं यदि मे भवेत्। तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन। गृहीते स्मिन्व्रते देव यद्यपूर्णे म्रियेद्यहं। त
न्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन। इति प्रार्थ्य नमस्कारान्कुर्यात्। अनंतरं गृहस्थे गंधपुष्पधूपदीपनैवेद्यकौपी
नाच्छादनदोरकगोपीचंदनमद्धंतकाष्ठाद्युपचारैः सम्यक्संन्यासीनां पूजा कार्या। ततो द्वितीयदिवसे देवं संपूज्य
विसर्जयेत्तद्दिने वा। उत्तिष्ठोत्तिष्ठ गच्छ गच्छ स्वपदं गच्छस्वेति। अत्रिः। समानसहायेषु निवसेद्योगवित्क्वचित्। वसे
त्समानशीलेषु सुशीलेषु तपस्विषु। इति यतिपूजाविधिः। अथात्रमितिहासः। धौम्य उवाच। विष्णुधर्मास्त्वयाख्या

ताः श्रुतास्त्वत्प्रसादतः। क्व तिथौ क्व च मासे वा व्यासरूपिजनार्दनः। पूज्यो येन विधिना किं फलं तद्वद प्रभो। आषा
ढस्य सिते पक्षे पूर्वाह्णव्यापिनी यदा। पूर्णमासी यदा तत्र व्यासरूपिजनार्दनः। पूज्यश्च यतिभिः सर्वैः हंसैः परमहंसकैः।
तैः पि सर्वैः प्रपूज्यो वै गृहमेधिभिरादरात्। सर्वतोभद्रमालिख्य तत्रैवैकलशं न्यसेत्। सौवर्णं राजतं वापि वंशपात्रं
ततोपरि। द्वादशारं प्रकल्प्याथ सौत्रैर्वायद्दसौत्रके। कालशानं विधायाथ पूजास्तत्रस्य देवता। तत्र यंत्रविधाने
न व्यासरूपो जनार्दनः। उपचारैः षोडशभिः पूजनीयः प्रयत्नतः। पौराणैर्नामभिर्वापि वेदमंत्रैर्विशेषतः। गृहस्थैर्नर
नारीभिस्तथा विद्यार्थिभिर्जनैः। तंडुलैश्चैतपुष्पैश्च नानावस्त्रैः फलैरपि। कौपीनैर्दंतकाष्ठैश्च चणकैश्च विशेषतः।
सौवर्णै राजतैर्वापि नारिकेरफलादिभिः। नानावाद्यैर्विशेषैश्च तत्र पूजाफलं शृणु। वासुदेवप्रसादेन सर्वविद्यावि
शारदः। सर्वशास्त्रप्रवीणश्च सर्वशास्त्रधुरंधरः। गजवाजिरथाद्यैश्च युक्तः सर्वगुणैरपि। उत्तमपुत्रकलत्राद्धिध
नधान्यादिभिस्तथा। चतुरंगबलोपेतः सप्तांगं राज्यधूकू सदा। मेधाप्रज्ञाधृतिः कांतिः सौभाग्यमतुलं भवेत्। सायं
याद्गमाधां तिर्दीक्षिएयमतुलं भवेत्। सभापांडित्यसौंदर्यगांभीर्यमतुलं भवेत्। भुक्त्वा भोगान्यथाकामं अंते विष्णुपदं व्रजे २५
त्॥ इति विष्णुधर्मोत्तरे दाल्भ्यपुलस्त्यसंवादे व्यासपूजाविधौ इतिहासः॥

अथयतिसंस्कारः।सिध्यनंतरंपुत्रादिशिष्योवास्नात्वा अधिकारसिध्यर्थंवपनंकृत्वाचरणेकुर्यात्।तत्रसं
कल्पः।करिष्यमाणेयतिसंस्कारे अधिकारार्थंकृच्छ्रत्रयात्मकंप्रायश्चित्तंप्रतिकृच्छ्रमेकैकगोनिष्क्रयद्रव्यदाना
अहमाचरिष्यइतिसंकल्पपूर्वकंकृत्वावपनंकुर्यात्।पुत्रातिरिक्तस्यवपनंनेतिकेचित्।देशकालौसंकीर्त्यब्र
ह्मीभूतनारायणरूपिणंभिक्षुंशौनकोक्तविधिनासंकरिष्यइतिसंकल्प्याव्रणंनवंकलशमादायतीर्थोदकेना
पूर्यतदुदकंगंगेयमुनेचैवगोदावरिसरस्वति।नर्मदासिंधुकावेरिजलेऽस्मिन्संनिधिंकुरु।नारायणपरंब्रह्मतत्वं
नारायणःपरः।नारायणपरोध्याताध्यानंनारायणःपरः।यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिवा।अंतर्बहिश्च
[illegible] तत्सर्वंव्याप्यनारायणस्थितः।देवदत्ततयाकश्चिद्भूत्वैवविकृतिंगतः।पूर्णब्रह्मैवसंप्राप्तस्तस्यब्रह्म
त्वमुच्यते।इत्येतैर्मंत्रैःकलशमाभि[illegible]मंत्र्य।प्राणायामपूर्वःसत्पूर्वैर्मंत्रैर्भिक्षुंस्नात्वा आपोहिष्ठेतितिसृभिःय
तेस्नानंकारयित्वापश्चात्तच्छरीरंवस्त्रचंदनाद्युपचारैरभ्यर्च्यशिक्येशरीरमारोप्यगंधपुष्पैरलंकृत्यमंत्रघो
षैर्जयशब्दादिभिर्दुंदुभिनादैरपिग्रामाच्चामरी चीवा दिशांनीत्वाशुद्धदेशंसमाश्रयेत्।नदीतीरेश्वत्थमूले

देवतायतनेवाधक्कादूरतरस्यगर्त्तंकुर्याद्यथाविधिःततोभूमिंव्याहृतिभिःसंप्रोक्ष्यदंडप्रमाणमधोगर्त्तं
चतुरस्रांदेवयजनमात्रीखनित्वातन्मध्येसूक्ष्मगर्त्तंसार्द्धहस्तपरिमितंकृत्वाव्याहृतिभिःपंचगव्येनप्रो
क्ष्यजलसमाधिपक्षेगर्त्तस्थानेमहानदींवापरिकल्प्यतत्रपंचगव्यंप्रक्षिप्यदक्षिणाग्रान्कुशानास्तीर्यस्नापयित्वा
शरीरंसंप्रोक्ष्यपुरुषसूक्तेनशंखोदकेनसंस्नाप्यप्रणवेनवाष्टोत्तरशतवारंस्नाप्यषोडशोपचारैरभ्यर्च्यतुल
स्यादिभिर्मिलितपुष्पमालाभिरलंकृत्यविष्णोर्हव्यंरक्षस्वेतिशरीरंगर्त्तेनिधायावाविधायॐइदंविष्णुर्विचक्रमे०सुरेस्वा विष्णु५
हेतिदक्षिणहस्तेदंडंवेधाकृत्वानिधायॐहंसःशुचिषत्०ब्रह्म।परेणनाकंनिहितंगुहायांविभ्राजतेतद्यत :
योविशंति।वेदांतविज्ञानसुनिश्चितार्थाःसंन्यासयोगाद्यतयःशुद्धसत्त्वाः।तेब्रह्मलोकेपरांतकालेपरामृतात्परि
मुच्यंतिसर्वे।इतिहृदयेजपेत्।पुरुषसूक्तंभ्रुवोर्मध्येजपेत्।ब्रह्मजज्ञानं०शिरःइतिमूर्ध्निजपेत्।विष्णोरराटम
सिविष्णोःपृष्ठमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवमसिवैष्णवमसिविष्णवेत्वा।इतिनाभौजपेत्। गता०
देवत्वासा०भ्यामितिकर्णयोःॐअस्मिभूमिमवागान्मातामातरमप्यगात्।भूयास्मपुत्रैःपशुभिर्योनोद्वेष्टिसभि २६

26

घृताभिति मंत्रेण मूर्द्धनि मश्मना परशुना शंखेन नारिकेलेन वा भिंघात्। शरीरे भेदनकर्तुमशक्तश्चेच्छिरसि गुडपिंडमन्य
स्मिन् फलं नारिकेलादि निधाय भिंघादित्याचारः। दर्भैराच्छाद्य प्रणवेन देवयजन लवण सिकतादिनापूरयेत्। न घाते च
छिरो भेदनानंतरं भूमिर्भूमिमवागान्मातेत्यादिना भिमंत्र्य दर्भैराच्छाद्य भूर्भुवः सुवरोमित्यभिमंत्र्य। पाषाणे ईंधन घ्रा
त्वे मल्लहृदे प्रणवेन स्वाहांतेनाभिहुत्वा देहं मोचयेत्। ततो अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा। हव्यवाड्जुह्वा
स्यः। त्वं ह्यग्ने अग्निना विप्रो विप्रेण संत्सता। सखा सख्या समिध्यसे। तं मर्जयंत सुक्रतुं पुरोयावानमाजिषु। स्वेषु
क्षयेषु वाजिनं। यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचंते यत्र पूर्वे साध्याः सं
ति देवाः। इति चतस्रोऽस्य च। ॐ चित्तिः स्रुक्। चित्तमाज्यं। वाग्वेदिः। आधीतं बर्हिः। केतो अग्निः। विज्ञातमग्निः। वाक्पति
र्होता। मन उपवक्ता। प्राणो हविः। सामाध्वर्युः। वाचस्पते विधे नामन्। विधेम ते नाम विधेस्त्वमस्माकं नाम। वाचस्पतिः
सोमं पिबतु। अस्मासु नृम्णां धात्स्वाहा। १। पृथिवी होता। द्यौरध्वर्युः। रुद्रोऽग्नीत्। बृहस्पतिरुपवक्ता। वाचस्पते वाचो
वीर्येण संभृततमेनायक्षसे यजमानाय वार्यं। आ सुवस्करस्मै वाचस्पतिः सोमं पिबति। जजनदिंद्रमिंद्रियाय स्वा

ता।। अग्निर्होता। अश्विना ध्वर्यू। त्वष्टाग्नीत्। मित्र उपवक्ता। सोमः सोमस्य पुरोगाः। शुक्रः शुक्रस्य पुरोगाः। श्राता स्त इं
द्र सोमाः। वातापेर्हवनश्रुत स्वाहा।३। सूर्यं मे चक्षुः। वातं प्राणः। द्यां पृष्ठं। अंतरिक्षमात्मा। अंगैर्यज्ञं। पृथिवीं श
27 रीरैः। वाचस्पतेऽछिद्रया वाचा। अछिद्रया जुह्वा। दिवि देवावृधं होत्रामेरयस्व स्वाहा।४। महाहविर्होता। सत्यहविर
ध्वर्युः। अच्युतयाजा अग्नीत्। अच्युतमना उपवक्ता। अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ। आयास्य उ
द्गाता। वाचस्पते हृद्विधे नामन्। विधेम ते नाम। विधेस्त्वमस्माकं नाम। वाचस्पतिः सोमं पात्। मा दैव्यस्तंतुश्छे
दि मा मानुष्यः। नमो दिवे। नमः पृथिव्यै स्वाहा।५। इति पंचानुवाकः सप्तग्रहाः। अतो देवो अवंतु न इति षड्चो ज
पित्वा जन्मादि संभावितपापैर्मुक्ता वयं अश्वमेधसहस्रस्य फलं प्राप्ता इति भावयंतो नमस्कृत्य अवभृथ यज्ञ ध्या
त्वा त्वा गंधादि[illegible]त्वा नैवेद्य शेषं गृहीत्वा आगमनोत्सवागमे पुरुषैर्द्विरिस्स रत्नपुरःसरं। पुत्र श्चोत्सवकेतुनेति अनु
वाकं गर्त्तस्य हृदस्य वा पश्चादुपविश्य होतवे देकस्त्वर्यैलाशांसेत्। ततो अग्निनाग्निरित्यादीनि विशेषः। ततः कर्त्ता गण॰
स्नात्वा चम्यासिद्धिं गतस्य ब्रह्मीभूतस्य नारायणरूपिणे तत्स्वधं तर्पणं करिष्य इति संकल्प्य[illegible]येन देवतीर्थेनैव ७

केशवं१नारायणं२माधवं३गोविंदं४विष्णुं५मधुसूदनं६त्रिविक्रमं७वामनं८श्रीधरं९हृषीकेशं१०पद्मनाभं११दामोदरं१२इति शुक्लपक्षे।
संकर्षणं१वासुदेवं२प्रद्युम्नं३अनिरुद्धं४पुरुषोत्तमं५अधोक्षजं६नृसिंहं७अच्युतं८जनार्दनं९उपेंद्रं१०हरिं११कृष्णं१२इति कृष्णपक्षे।

आत्मानं तर्पयामि। अंतरात्मानं तर्पयामि। परमात्मानं तर्पयामि। गुरुं तर्पयामीत्यावृत्त्या चतुर्वारं तर्पणं कुर्यात्। ततः शुक्ल
पक्षमृतस्य केशवादिद्वादशनामभिः कृष्णपक्षमृतस्य संकर्षणादिद्वादशनामभिरित्येवं तर्पणं कुर्यात्। तच्च केशवं तर्प
यामीत्यादिप्रकारेण द्वितीयांत नामोच्चारणपुरःसरं तर्पयामीत्यंतेन कुर्यात्। इदं तर्पणं द्वीरेणोतिके चित्। तीरं प्राप्य धौ
तवस्त्रं परिधायाचम्य स्थंडिले गृहस्य ब्रह्मणो मृतस्य परमहंसस्य नारायणरूपिणः स्तत्प्रीत्यर्थं नारायणपूजनं महं करिष्य इ
ति संकल्प्यादेवयजनोपस्मिन्नदितीरेवा चतुरस्रवेदिकां संपाद्य तत्र मन्मयं लिंगं संस्थाप्या जंकृत्स्य। अशक्तौ न द्वितीय
एव तत्स्वरूपं विचिंत्य वा पुरुषसूक्तेनैकर्चीतेन नमो नारायणायेति मंत्रमुक्त्वा तन्मंत्रसहितषोडशभिरावाहनादिषोडशो
पचारपूजां कृत्वा घृतपायसबलिं निवेद्य घृतदीपं च नैवेद्यतन्निवेदितपायसं तद्घादिजले क्षिपेत्। ततः शंखेन
शुद्धजलमादाय तत्र गंधपुष्पतुलसीदलफलादिकं च प्रक्षिप्य ॐ ब्रह्मणे नमः इदमर्घ्यं तर्पयामीत्येवमष्टौ अर्घ्याणि
दत्वा गृहं गच्छेत्। इति प्रथमदिनकृत्यं। एवं दशदिनपर्यंतं द्वीरतर्पणपूजनपायसबलिदानदीपदानार्घ्यदानानि प्रत्य
हं कुर्यात्। तत एकादशेऽह्नि पार्वणं। तत्र प्रयोगः। एकादशाहे पुत्रः स्नातः कृतनित्यक्रियो मध्याह्ने विप्रानाहूय तद्घादे

28

ति ॥ तर्पणं कृत्वा देशकालौ संकीर्त्य काश्यपगोत्रस्य ब्रह्मीभूतस्य केशवशर्मणो मम पितुः करिष्यमाणदर्शा
दि सर्वश्राद्धाधिकारार्थम् अद्य पार्वणश्राद्धं करिष्ये इति संकल्प्य यज्ञोपवीती पूर्ववत् दर्भसंस्तरके विश्वेदेवार्थ
मेवैकं वा निमंत्र्य । प्राचीनावीती अस्मत्पितुः काश्यपगोत्रस्य ब्रह्मीभूतकेशवशर्मणः वसुरूपस्य स्थाने क्षणः
क्रियतां पितामहस्य प्रपितामहस्थाने इत्यादि । निमैकपक्षे ब्रह्मीभूत पितृपितामहप्रपितामही[illegible]स्यादि दर्भश्रा
द्धवत् तिलादि त्रीनुद्दिश्य पार्वणश्राद्ध विधिनैव समाप्य । यथाधिकारं वैश्वदेवादिकं कृत्वा तु गृहे गुरुतो भुंजीत ॥ इ
॥ गुर्वादन्यः शिष्यः कर्त्ता चेत् अद्य सव्यज्ञोपवीती एव आत्मानं तर्पयामि । अंतरात्मानं तर्पयामि । परमात्मानं त
र्पयामि । गुरुं तर्पयामीति देवतीर्थेनैकैकमंजलिं दत्वा गृहमेत्य प्राणानायम्य देशकालौ संस्मृत्य ब्रह्मीभू
तस्य गुरोः प्रत्यब्दादिश्राद्धाधिकारसिध्यर्थम् अद्य पार्वणश्राद्धं करिष्ये इति संकल्प्य साधुगुरुसंस्तरके वि
श्वेदेवार्थे क्षणः क्रियतामिति [illegible]वादिमध्यमेकं वा निमंत्र्य । संबंधनामादिस्थाने ब्रह्मवर्जं गुरोः । तत्र गुरोः ग॰ण॰
कर्त्तव्यपार्वणश्राद्धे आसनस्थाने क्षणः क्रियतामिति क्षणं दत्वा एवं अंतरात्मासनस्थाने ॰ परमात्मासनस्थाने ॰ २८

विप्रैकयन्ते आत्मा अंतरात्मा परमात्मनामास्थाने क्षणः क्रियतामिति विशेषः ततो ब्राह्मणान्कृतपादशौचानाचां
तान्प्राङ्मुखानुदङ्मुखांश्चोपवेश्य साधु कुरुत्वं सकानां विश्वेषां देवानामिदमासनमित्यादि विश्वेदेवार्चनं
विधाय यज्ञोपवीत्येव आत्मनः इदमासनं स्वाहा न ममेति यवसहित सकुशदर्भद्वयरूप मासनं दक्षिणतो दत्वा ए
वमग्रेपि। अंतरात्मन इदमासनं। परमात्मन इदमासनं। ततः प्रागग्रदर्भोपरि पात्रत्रयं प्राक्संस्थमास्थाप्य प्रति
पात्रे दर्भद्वयान्विते जलमासिच्य शन्नोदेवीरिति सकृन्मंत्र्य यवोसि सोमदेवत्यो गोसवो देवनिर्मितः। प्रत्न
मा
मद्भिप्रत्तः स्वाहा आस्मै रिमान्धलोकान्प्रीणाहि नः स्वाहा न म इति मंत्रेण प्रतिपात्रं यवान्नोप्य। [illegible]ती यपात्रे अंत
रा०। ततीयपात्रे परमात्मानमित्यरहः। तल्लीवा गंधपुष्पाणि च प्रक्षिप्य स्वाहार्घ्याः इति निवेद्य आत्मन्निदमर्घ्यं स्वा
हा न मम। अंतरात्मन्निदमर्घ्यं परमात्मन्निदमर्घ्यं स्वा० न०। इत्यर्घ्यं दत्वा। आत्मन् एष गंधः। अंतरात्मने एष गंधः। प
रमात्मने एष गंधः। एवं पुष्पाणि। एष धूपः। एष दीपः। इदमाच्छादनं। इत्यभ्यर्च्य भोजनपात्रेणोपासाद्योपस्ती
र्य भोजनार्थं दत्वाद्युपस्थितं दत्तकृत्वा। आत्मने स्वाहा। अंतरात्मने स्वाहा। परमात्मने स्वाहा। यथाशास्त्र अन्नोपा

29

णिष्ठवाऊत्वा। अत्राग्नौकरणं नास्तीति केचित्। ततोन्नादिपरिविष्यगायत्र्या प्रोक्ष्य अपृथिवीते० इदं विष्णुः० सा
धुरूरुसंस्तकेभ्यो विश्वेभ्योदेवेभ्यः इदमन्नं सोपस्करं स्वाहा न मम। आत्मने इदमन्नं०। अंतरात्मने इदमन्नं०
परमात्मने इदमन्नमित्यादित्यागं कृत्वा। ब्रह्मार्पणं० एको विष्णुः० अनेन ब्राह्मणभोजनेन नारायणः प्रीयतां।
ईतत्सत्। अपामेध्यमिति बर्हिरिह हृत्य अपहता इति प्राग्ग्रमेकाकारेखां कृत्वेत्यादि। मार्जयंतामात्मनः। मार्ज
यंतामंतरात्मनः। मार्जयंतां परमात्मनः। इति दर्भमिलनमध्यात्रेषु त्रिषु कृत्वेषु जलं निनीय। आत्मन् अयं
ते पिंडः स्वाहा न मम। अंतरात्मन् अयं ते पिंडः स्वाहा न मम। परमात्मन् अयं ते पिंडः स्वाहा न मम। इति पिंडत्रयं
दत्वात्स्त्रीमनुमंत्रणादिपिंडप्रवाहणांतं समाप्य। भुक्तवद्भ्यो ब्राह्मणेभ्यो तांबूलदक्षिणां दत्वा नमस्कृत्य वि
सृज्य वैश्वदेवादिकं स्वासुहृद्युतो भुंजीतेति। शिष्यं प्रति पार्वणप्रयोगः। ततो द्वादशे द्विनारायणबलिं कुर्यात्।
तत्प्रयोगः। एकादशे द्वादशे वेति विहितकाले शुद्धः स्नात्वा देशकालौ संकीर्त्य ब्रह्मीभूतस्य गुरोः सिद्धि दि गण०
नमारभ्य द्वादशेहनि विष्णुकेशवादिद्वादशरूपिणो गुरोः संभावित सर्वपापक्षयपूर्वक विष्णुलोकावाप्तिद्वारा २९

श्रीनारायणप्रीत्यर्थंनारायणबलिंकरिष्यइतिसंकल्प्यकलशपद्मम तस्यतुकेशवादिस्थलेसंकर्षणादिसुद्धे
स्वः।ततस्त्रयोदशावरान्यतीन्-असंभवेत्रयोदशविप्रान्वासपत्नीकान्सपुत्रादीन्निमंत्रयेत्।तत्रप्रथमेके
शवरूपिविष्ण्वर्थेभवद्भिःक्षणःकर्त्तव्यः।१।नारायणरूपिविष्ण्वर्थेभवद्भिःक्षणःकर्त्तव्यः।२।माधवरूपिविष्ण्वर्थेभ
वद्भिःक्षणःकर्त्तव्यः।३।गोविंदरूपी०।४।विष्णुरूपी०।५।मधुसूदनरूपी०।६।त्रिविक्रमरूपी०।७।वामनरूपी०।८
श्रीधररूपी०।९।हृषीकेशरूपी०।१०।पद्मनाभरूपी०।११।दामोदररूपी०।१२।कलशेसंकर्षणरूपिविष्ण्वर्थेभवद्भिः
क्षणःकर्त्तव्यः।१।वासुदेवरूपी०।२।प्रद्युम्नरूपी०।३।अनिरुद्धरूपी०।४।पुरुषोत्तमरूपी०।५।अधोक्षजरूपी०।
६।नारसिंहरूपी०।७।अच्युतरूपी०।८।जनार्दनरूपी०।९।उपेंद्ररूपी०।१०।हरिरूपी०।११।कृष्णरूपी०।१२।इतिद्वाद
शविप्रान्निमंत्र्य।त्रयोदशंविप्रंयमालसंस्थलजितेंद्रियंब्राह्मणमेकंविष्ण्वर्थेभवद्भिःक्षणःकरणीयः।इतिनिमं
त्र्यपादप्रक्षाल्यप्राङ्मुखाननुपवेशयेत्।ततोब्राह्मणोग्निहोमस्थानंप्रकल्प्य।तत्रस्थंडिलेयत्रक्वचाग्निमितिविधि
नाग्निंप्रतिष्ठाप्यपायसमष्टात्रिंशदाहुतिपर्यन्तंपुरुषाहुतिपर्यन्तंविष्णुनैवेद्यार्थंचश्रपयित्वाअभिघार्यप्राचीन

गृहीत्वैनं वोद्धस्य प्रतिष्ठितमसि प्रायो ग्निमिध्मस्याद्याग्निमुखांतं कुर्यात्। कर्त्री आग्नजापनश्चेत् क्रियमाणे
होमे स्थंडिलाद्यकरिष्य इत्याद्यग्निध्यानांतेऽन्वादध्यात्। समिद्धयमाज्याय क्रियमाणे नारायणाय बलिहोमदेवता
परिग्रहार्थमन्वाधानं करिष्ये। अस्मिन्नन्वाहितेऽग्नावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा अत्र प्रधानं अग्निं वा
युं सूर्यं प्रजापतिं च व्यस्तसमस्तव्याहृतिभिरेकैकया पायसाहुत्या निर्मि। अतो देवेति षड्भिः प्रत्यृचमेकैकया पायसाहु
त्या। नारायणं पुरुषसूक्तेन प्रत्यृचमेकैकया पायसाहुत्या केशवादिद्वादशदेवताः कृष्णं संकर्षणादिद्वादशदेवता
एकैकया पायसाहुत्या शेषेण स्विष्टकृदित्यादि पूर्णपात्रनिधानांते छिप्रं चाद्यादधिक प्रातमुष्टितं त्सी निरूप्याव घातादिपा
य संश्रपयित्वेत्याद्याज्यभागांतं कुर्यात्। इति विशेषः। ततोऽग्रेणाग्निं शालियवाने विष्णुपुरुषसूक्तेन प्रत्यृचं न
मो नारायणायेति तेन षोडशोपचारैरभ्यर्च्याग्निसमीपमेत्यावदानसंपदा स्रुचा हस्तेन वा होमं कुर्यात्। तत्र क्र
मः। ॐ भूः स्वाहा। अग्नय इदं०। ॐ भुवः स्वाहा। वायव इदं०। ॐ भुवः स्वाहा। वायव इदं०। ॐ सुवः स्वाहा। सूर्यायेदं०। ॐ ग।ण०
भूर्भुवः सुवः स्वाहा। प्रजापतय इदं०। ७। अतो देवा अवंतु नो भिः स्वाहा। विष्णव इदमिति षड्भिः स्वपित्यागः। पा इदं विष्णु ३०
र्यतो विष्णुर्विचक्रमे। पृथिव्याः सप्त धाम०

30

स्वाहा।६।त्रीणिपदा०यन्स्वाहा।७।विष्णोःकर्माणि०स्वाहा।८।तद्विष्णोःपरमं०स्वाहा।९।तद्विप्रासो०पदं स्वाहा।१०।सहस्र
शीर्षा०लं स्वाहा।नारायणायेदमिति षोडशेषु त्यागः।११।पुरुषएवे०ति स्वाहा।१२।एतावानस्य०नि स्वाहा।१३।त्रिपादूर्ध्व
उ०भि स्वाहा।१४।तस्माद्विरा०रः स्वाहा।१५।यत्पुरुषेण हवि०।१६।तंयज्ञं०ये स्वाहा।१७।तस्माद्यज्ञात्सर्वहुतः संभृतं०ये स्वा
हा।१८।तस्माद्यज्ञात्सर्वहुत ऋचः०त स्वाहा।१९।तस्मादश्वा०यः स्वाहा।२०।यत्पुरुषं व्यदधुः०ते स्वाहा।२१।ब्राह्मणोस्य०
त स्वाहा।२२।चंद्रमा मनसो०।२३।नाभ्या आसी०न् स्वाहा।२४।सप्तास्यास०मुं स्वाहा।२५।यज्ञेन यज्ञ०वाः स्वाहा।२६।ॐ केश
नमः
वाय स्वाहा।यथालिंगं त्यागः।२७।ॐ नारायणाय नमः स्वाहा।२८।ॐ माधवाय नमः स्वाहा।२९।ॐ गोविंदाय नमः स्वाहा।३०।
ॐ विष्णवे नमः स्वाहा।३१।ॐ मधुसूदनाय नमः स्वाहा।३२।ॐ त्रिविक्रमाय नमः स्वाहा।३३।ॐ वामनाय नमः स्वाहा।३४।
ॐ श्रीधराय नमः स्वाहा।३५।हृषीकेशाय नमः स्वाहा।३६।ॐ पद्मनाभाय नमः स्वाहा।३७।ॐ दामोदराय नमः स्वाहा।३८।
इत्यष्टात्रिंशदाहुतीः पायसेन कुर्यात् कल्पहोमं तस्य केशवादि द्वादश देवता स्थाने ॐ संकर्षणाय नमः०।१।ॐ वासु
देवाय०।२।ॐ प्रद्युम्नाय०।३।ॐ अनिरुद्धाय०।४।ॐ पुरुषोत्तमाय०।५।ॐ अधोक्षजाय०।६।ॐ नारसिंहाय०।७।ॐ अच्युताय०।

स्विष्टकृद्धोमः। महाव्याहृत्यादिनवाहुतयः संस्रवप्राशनादि ब्रह्मणो सर्जे॰

ॐ जनार्दनाय०१९। ॐ पद्मनाभाय०२०। ॐ हरये०२१। ॐ कृष्णाय०२२। स्विष्टकृदादितंत्रशेषं समाप्य पुनर्विष्णुं संपूज्य। नारा
यणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात्। विष्णवे नमः इदमर्घ्यं समर्पयामीत्यर्घ्यं दत्वा कृतहोमेन
पायसेन पक्वीकृ मंत्रेण विष्णवे इमं बलिं समर्पयामि इति बलिं दद्यात्। ततो निमंत्रितब्राह्मणान्पूजयेत्। यथा के
शवरूपिणे गुरवे नमः इदमासनं१। नारायणरूपिणे गुरवे नमः इदमासनं२। माधवरूपिणे०३। गोविंदरूपिणे०४।
विष्णुरूपिणे०५। मधुसूदनरूपिणे०६। त्रिविक्रमरूपिणे०७। वामनरूपिणे०८। श्रीधररूपिणे०९। हृषीकेशरूपिणे०
१०। पद्मनाभरूपिणे०११। दामोदररूपिणे०१२। इत्यासनं दत्वा। कृष्णे संकर्षणरूपिणे०१। वासुदेवरूपिणे०२। प्र
द्युम्नरूपिणे०३। अनिरुद्धरूपिणे०४। पुरुषोत्तमरूपिणे०५। अधोक्षजरूपिणे०६। नारसिंहरूपिणे०७। अच्यु
तरूपिणे०८। जनार्दनरूपिणे०९। उपेंद्ररूपिणे०१०। हरिरूपिणे०११। कृष्णरूपिणे०१२। एवं गंध० पुष्प० धूप० दीप० आ
च्छादनानि दत्वा। त्रयोदश विप्राग्र्यं पुरुषसूक्तेन प्रत्यर्चान्ते विष्णवे नमः विष्णुं आवाहयामि। एवमासनादिदीपांतोप गण०
चारैरभ्यर्च्य। चतुरस्रमंडलोपरि भोजनपात्राण्यास्ताद्योपस्तीर्य विशिष्टपायसादिभोज्यद्रव्यं पात्रेषु परिविष्य गा ३१

31

यच्चात तत्पात्रस्थमन्नं प्रोक्ष्य पृथिवी ते पात्रमिदं विष्णुरिति मंत्राभ्यामुपस्पर्शयित्वा तत्तद्रूपी गुरूपदेन विष्णुदेवोनच
तत्रत्यान्नमनं स्पृष्ट्वा। अतोदेवा अनंतुनषदृचौ ॐ तद्ब्रह्म ॐ तद्वायुः ॐ तदात्मा ॐ तत्सत्यं ॐ तत्सर्वं ॐ तत्पुरोर्नमः ॐ अंतश्च
रति भूतेषु गुहायां विश्वमूर्तिषु। त्वं यज्ञस्त्वं वषट्कारस्त्वमिंद्रस्त्वं रुद्रस्त्वं विष्णुस्त्वं प्रजापतिः। त्वं तदाप आपो ज्योती
रसोमृतं ब्रह्म भूर्भुवः सुवरों इत्यनुवाकं जपेत्। ततो ब्रह्मार्पणं ब्रह्म हविरित्यादि पठित्वा आपोशानादिकाले चंद्रमा मन
सइत्युचवृत्वा प्राणाय स्वाहेत्यादिमंत्रेण प्राणाहुतीर्गृहित्वा अपेक्षितं याचितव्यमि त्यादिभिः संप्रार्थ्य। अथ हवेषु
रुषो नारायणोकामयते त्यादिकानो पनिषद्भागानश्रावयेत्। भुक्तवत्सु पुनरोंतद्ब्रह्मेत्यनुवाकं जपित्वा तद्घास्केति पृष्ट्वा
उत्तरापोशानं दद्यात्। ततः आचांतेषूपविष्टेषु निस्त्वर्यद्विजोच्छिष्टसन्निधौ प्रागग्रेषु दर्भेषु उपविश्य तत्र प्रागग्रान्दर्भानास्ती
र्य तेषु ॐ नमो नारायणाय सृष्टाहरेणाहतोदकं दत्वा केशवस्वरूपिणे कृष्णाय यं पिंडः स्वाहा नम इत्येकैकां दत्वा दशनामभि
र्दशपिंडान्पायसेन दद्यात्। कल्पेतु संकर्षणस्वरूपिणे गुरवे यं पिंडः स्वाहा नमम इत्यादि यद्भामः स्वधा भुवः स्वधा
सुवः स्वधेति बौधायनोक्तैस्त्रिभिर्मंत्रैः केशवादिद्वादशमूर्तिरूपिणे यं पिंडः स्वाहा नम इत्येवमंत्रैस्त्रीन्पिंडान्पायसेन द

घातात्ततःपूर्वदत्ततोयकंदत्वापिंडेषुविष्णुंसंपूज्यपुरुषसूक्तेनस्तुत्वाविसर्जयेत्।ततोद्वादशब्राह्मणेभ्योनारायण
बलिस्थांगतायैतांबलंदक्षिणांदानमहंतुभ्यंसंप्रदद्ये इतिसंकल्प्यपूर्वकंदत्वाविष्ण्वर्थंत्रयोदशद्विजायनाभ्याञ्चा
सीतिफलं।सद्यास्यासलिलितितांबलं।यस्तेनेतिदक्षिणांदत्वासर्वान्प्रदक्षिणीकृत्यसाष्टांगंप्रणम्ययथाशक्त्या
अनुव्रज्यहर्षपुरःसरंतान्प्रेषयेत्।नारायणबलिकालेपूजितांविष्णुमूर्तिमाचार्यायदद्यात्।इत्याचार इतिकेचि
त्।ततःकर्मेश्वरार्पणंकृत्वासुहृद्युतोभुंजीत।एतावद्विस्तरप्रयोगाशक्तौबौधायनोक्तव्याहृतिहोमबलित्रयमा
त्रसहितोवाप्रयोगःकार्यः।एतैर्मंत्रैःसमिदाज्ययोरपिप्रत्येकंहोमइतिकेचित्।तत्रमूलंचिंत्यं।।इतिबौधायन
शौनकयमस्मृत्यनुसारियथाचारानुगृहीतोनारायणबलिप्रयोगः।।अथषष्ठदशाहेवायथाचारसमाराधनं।तत्रायं
प्रयोगः।गुरुचतुष्टयस्यकेशवादीनांचप्रत्येकमेकैकद्वयेनषोडशब्राह्मणपक्षमभिप्रेत्यउच्यते।प्रातर्होमोत्तरस्मि
न्ब्रलीमलस्यगुरोःसमाराधनेगुर्वर्थेभवद्भिःक्षणःकर्तव्यः।एवंपरमगुर्वर्थे०।परमेष्ठीगुर्वर्थे०।परात्परगुर्वर्थेभव
द्भिःक्षणःकर्तव्यः।यद्वा।विश्वरूपधराचार्यार्थे०।ततोगुरुकत्रयमितिवाचयित्वाशेषब्राह्मणान्निमंत्र्यमध्याह्नेब्राह्मणा गणे०
३२
ततःकेशवार्थेक्षणः०।एवंसंकर्षणार्थेभवद्भिःक्षणः०इत्येवंद्वादशविप्रान्निमंत्र्य१

नाहूय कर्त्ता शुचिराचम्य पवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य श्रीनारायणप्रीत्यर्थं ब्राह्मणतस्य गुरोर्दोध्य
नं करिष्य इति संकल्प्य गंधाक्षततुलसीकर्पूरादिभिः जलेन वरणक्रमेण तेषां पादप्रक्षालनं कृत्वा तानाचमय्य
स्वयं चाचम्य पादप्रक्षालनोदकं पात्रांतरे गृहीत्वा तत्पादौ साक्षतगंधपुष्पतुलसीदलैरभ्यर्च्य आनंदमानंदक
रं प्रसन्नं ज्ञानस्वरूपं निजबोधयुक्तं । योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामीति नमस्कुर्यात् । एवं सर्वेषां पूजां
कृत्वा गंधादिभिः तत्पात्रमलंकृत्य देवसन्निधौ संस्थाप्य कुशासनेषु प्राङ्मुखान् वा उपवेश्य पुरुषसूक्तेन प्रत्य
चमों नमो नारायणायेति मंत्रसहितमावाहनादिषोडशोपचारैः पदार्थानुसमयेन अभ्यर्चयेत् । गंधपुष्पधू
पदीपाच्छादनांतां पूजां कृत्वा । ततः सर्वेषु पात्रेषु पायसादिविशिष्टद्रव्यं साज्यं व्यंजनसहितं च परिविष्य गाय
त्र्याप्रोक्ष्य गुरवे इदमन्नं परिविष्टं परिवेक्ष्यमाणं चातृप्तेः स्वाहा हव्यं न मम । एवं परमगुरवे इदमन्नं । परमेष्ठीगु
रवे इदमन्नं । परात्परगुरवे इदमन्नं । विश्वरूपधराचार्यवा आदौ तल्लोगुरुत्रयं । ततः केशवाय इदमन्नं । कल्ले
संकर्षणाय इदमन्नं । इति सर्वत्रान्नत्यागं कृत्वा । उँ तद्ब्रह्मेत्यनुवाकं ब्रह्मार्पणमित्यादि जपित्वा भोजनेषु प्रविष्टे

षुउपनिषद्मंत्रान्श्रावयेत्॥ तद्देषुउंतद्भद्रेत्यनुवाकंजपित्वाउत्तरापोशानोत्तरमाचांतेषूपविष्टेषुविशिष्टतांबू
लदक्षिणावस्त्रादिभिरभ्यर्च्यउपविष्टेष्वेवतेषुगुर्वाराधनांगभूतंतीर्थप्राशनंकरिष्यइतिसंकल्प्य॥ चतुरस्त्रंमं
डलंगोमयेनोपलिप्यतत्ररंगवल्यादिभिरलंकृत्यतन्मंडलेधान्योपरिपादोदककलशंसंस्थाप्य॥ तत्रगंगादि
सर्वतीर्थानिभावयित्वापुरुषसूक्तेननमस्यचंतीर्थराजायनमइत्यंतेनषोडशोपचारैरभ्यर्च्यतैःपात्रंशिरसि
धृत्वा॥ लोकःसरस्वत्यायांत्येषवैदेवयानःपथाक्तमेवन्वारोहत्याक्रोशंतोयांत्यवर्तिमिवान्यस्मिप्रतिषज्य
प्रतिष्ठांगच्छंतियदाप्यशतंकुर्वंत्यथैकमुत्थानंशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रियेप्रतितिष्ठंतियदा
शतंसहस्त्रंकुर्वंत्यथैकमुत्थानंसहस्त्रसंमितोवा॥ असौलोकेमुमेवलोकमभिजयंतियदेषांप्रमीयेतय
दावाजीयेरन्नथैकमुत्थानंतद्द्वितीयंइत्यनुवाकशेषंभोबाल्माद्भातःपवतइत्यनुवाकंचजपित्वाहविषोत्तमप
रःस्वरंस र्वन्नसंचक्रत्वातत्पात्रंपुनर्मंडलेसंस्थाप्यचंदनाक्षतपुष्पाणिपूजाशिष्टानिबंधुभिःसहस्वयंधृत्वा
विप्रान्प्रदक्षिणीकृत्यआनंदमानंदयत्गुरुर्ब्रह्मागुरुर्विष्णुरित्यादिमंत्रैर्द्विजांस्तीर्थराजंचनमस्कृत्यगुर्वर्पणेन ग०ा० ३३

महत्वेत्या पादोदकपात्रं दत्वा तद्धस्त्यात् तत्तीर्थं मंत्रेण गृह्णीयात् । तत्र मंत्रः । अविद्यामूलशमनं सर्वपापप्रणाशनं । गु
रोः पादोदकं चित्रसंसारदमनाशनं । पुत्रादिकामनायोल्लशोषणं पापपंकस्य दीपनं ज्ञानचेतसः । गुरोः पादोदकं
चित्रं पुत्रपौत्रप्रवर्द्धनमिति गृह्णीयात् । तान्पुनः प्रणम्य तानन्यांश्च दक्षिणाभिस्तोषयित्वा सन्मानपुरःसरं तानतुव्र
ज्य कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुंजीतेति । ततः प्राप्त दर्शमहालयतीर्थप्रयुक्तादिश्राद्धानि कुर्यात् । प्रतिमासेवमे
वाराधनं प्रत्यब्दं पार्वणोत्तरं चाराधनं चैवमेव । इत्थं करणाशक्तो यथाशक्ति यतीन् यथाशक्ति ब्राह्मणानाहूय पादप्र
क्षालनपूर्वकं गंधादिभिरभ्यर्च्य भोजयेदिति । इति नागरखंडानुसार्याचारानुग्रहे तदाराधनाप्रयोगः ॥ अ
थ यतिसंस्कारे किंचिदुपयोगि निर्णय । तत्र यमः । दंडग्रहणमात्रेण प्रेतत्वं नैव जायते । प्रेतत्वस्य विमोक्षार्थं षोड
शश्राद्धिको विधिः । पिंडोदकं न वा न्यादि हुत्त्यक्षमानिरस्तये । सपिंडिकरणश्राद्धं पितृत्व प्राप्तये विधिः । अवस्थात्र
यहीनानां यतीनां द्वादशेहनि । श्राद्धाधिकारसिध्यर्थं पार्वणं तत्सुतश्चरेत् । नाम गोत्र संबंध रूपावस्थात्रय प्रच्युता
नां यतीनां पूर्वसंबंधनामगोत्रोद्धरणं क्रियमाणाप्रत्यब्ददर्शादिश्राद्धेषूद्देश्य लसिध्यर्थमित्यर्थः । वसिष्ठः । चतु

र्विधानां भिक्षूणां ज्ञातिबंधुसुतादिभिः। एकादशेऽह्नि कर्त्तव्यं श्राद्धं तेषां तु पार्वणं ॥ स एवाऽऽह एकोद्दिष्टं जलं पिंडमाशौचं प्रेत
सत्क्रियां न कुर्यात्पार्वणादन्यद्ब्रह्मीभूतपरिव्रजे ॥ पितृमेधः ॥ कुटीचकं तु प्रदहेत्स्वयं ते तु बहूदकं ॥ हंसं जले विनिक्षिप्य पर
महंसं प्रकीरयेत् ॥ सपिंडनादि नैवेषां सर्वेषां स्मृतिशासनात् ॥ अहन्येकादशे प्राप्ते पार्वणं श्राद्धमाचरेत् ॥ सुमंतुः ॥ मा
सिकं नैव कुर्वीत सपिंडीकरणं न च ॥ अंगिरसः ॥ क्षेत्रजो वापि जातो वा तत्सुतोपि च ॥ कुर्याच्च पार्वणं श्राद्धं शिष्यांतेवास
भ्रमिपः ॥ पिंडयत्नं सुतः कुर्यात् दर्शश्राद्धं मृतेऽहनि ॥ यतेर्महालये दर्शे तिथ्यां वा मृतिवासरे ॥ पार्वणं त्वितरेषां तु एकोद्दिष्टं तु वा
भवेत् ॥ स्कांदे ॥ चतुर्थं नाश्रमं गच्छेद् ब्रह्मविद्यापरायणः ॥ एकदंडी त्रिदंडी वा सर्वसंगविवर्जितः ॥ एकादशेऽह्नि संप्राप्ते त्य
स्य तु द्वादशेऽहनि ॥ पार्वणेन विधानेन श्राद्धं कुर्यात्तदौरसः ॥ नारायणबलिं कृत्वा पार्वणं श्राद्धमाचरेत् ॥ प्रत्यब्दे दार्शि
कश्राद्धे तीर्थे च पितृमहालये ॥ संबंधनामगोत्रेण श्राद्धकालेषु नित्यशः ॥ अन्यत्रापि ॥ संबंधनामगोत्रैश्च पार्वणं द्वा
दशेऽहनि ॥ तन्मासात्ययः कुर्युरेकादशे दिनेपि वा ॥ अथवामांतमाप्नोति परमात्मसु सुरुहतः ॥ तच्छ्राद्धे साधुरूरुवावि ग.ण.
श्वेदेवाः प्रकीर्त्तिता इति ॥ पुत्रादिस्तातिकर्त्तृकश्राद्धे संबंधनामगोत्रैरुद्देश्यः ॥ शिष्यादिकर्त्तृक तत्पार्वणश्राद्धे तु श्रा ३४

मांतरात्मापरमासे सुद्धेस्व:। साधुरूत्सौ निश्चेदेवा:। न उत्तरवर्ष्ट्विसंस्सकानि श्चेदेवा:। एतत्सत्येय ज्ञोपवीति पवाश्चाति
त्वार्थे। संकल्पादिपिंडदानांतमग्नौकरणवर्जं दैवश्राद्धं वदविकृतमितिविशेष:। अयम: एकादशेऽह्नि कर्त्तव्यो नाराय
णबलिस्तत: पाकांतरेण तत्रैव पार्वणश्राद्धमाचरेत्। बौधायनशौनकौ। अहन्येकादशे प्राप्ते पार्वणं तु विधीयते। नारा
यणबलिश्चास्य कर्त्तव्यो द्वादशेऽहनि। अत्र नारायणबलिश्राद्धयोरेव दिनानुष्ठानपक्षे एकादशे द्वादशे वाह्नीति काल
विकल्प:। नारायणबलिं कृत्वा पार्वणश्राद्धाचरणं पाकांतरेण। नारायणबलिं कृत्वेत्यादिस्कंदात्। पाकांतरेणेति यमवा
क्यात्। अनेनैतद्भ्रा। शिष्यादिकर्त्तृकतत्पार्वणश्राद्धस्य दैवत्वेन तेनैव कालत्वादेकपाकेन पाकांतरेण वा तंत्रेणानुष्ठानमि
तिविशेष:। दिनभेदेन तयो: करणपक्षे तु एकादशे पार्वणं द्वादशे नारायणबलि:। तद्दिन एव एकपाकेन पाकांतरेण वा त्र्या
राधनं असंभवे त्रयोदशेतिने:। तत: प्रतिमासं मृततिथौ श्राद्धधनमेवं नरसांतां मृततिथावपि। तथा च संग्रहे।
यतो मृते तु वपनं पार्वणं [illegible] प्रतिमासं च कुर्यादाराधनं बुध इति। अस्यार्थ:। यतो मृते तु वप
नपर्वकं तत्संस्कार: पुत्रादिभि: कार्य:। तत एकादशे द्वादशे वेति विहितकाले पार्वणश्राद्धं। तथैव विहितकाले विद्धुप

जनंनायमणेबलिः। ततः प्रतिमासं प्रत्यब्दं च कार्यं मरणोत्तरं द्वादशाहे चाराधनमिति। द्वादशाहे मृताहे च आरा
धनमथान्तरे दिति नागरखंडात्। समानन्यायाद्दिनादिकाजेष्वप्याराधनमिति केचित्। तत्र प्रतिमासमाराध
धनमेव। न पार्वणं। मासिकं नैवेति वाक्यांतरेण तस्य निषेधात्। प्रत्यब्दं तु पार्वणोत्तरं तद्दिन एव पाकांतरेणाराध
नं प्रत्यब्दइति पृथ्वीचाहृतस्कांदवाक्येन तत्र पार्वणविधानात्। तच्च प्रत्यब्दं पार्वणं पुत्रादीनामेव। तन्नियामक
सुमंतुवाक्ये सुतग्रहणात्। शिष्यादीनां तु आराधनमेव। अपुत्रयति विषये तु प्रत्यब्दं शिष्यादेरप्युक्तदेवश्रा
द्धप्रकारेण पार्वणमपि भवतीति केचित्। तत्रैकादशेह्नि पूर्वसंबंधनामगोत्रोच्चारेण न पित्रादित्र्युद्देश्यकं प्रासि
द्धपार्वणं धर्मकं श्राद्धं कार्यमिति थ्यादिश्रवणात् ते ब्रह्मीभूतस्य गुरोर्मृतदिनाद्यागम्यैकादशेहनि पितुः संबंधनाम
गोत्रोच्चारेण न करिष्यमाणे सर्वश्राद्धे द्वैरयताः सिध्यर्थं पार्वणश्राद्धं करिष्य इति विशेषः। संकल्पे। अत्र स्थाने
यदीन्नानामिति यमवचनं संबंधनामगोत्रैश्चेति मत्स्यं तरवचनं चेध्यासंकल्पेऽमुकानां इतरदविकृतं प्रत्यब्द ग०ण०
वत्। पूर्वकृते नैव च तिलतर्पणेन तदंगस्यापि सिद्धिः। न परेहनि। प्रत्यब्दवत्तद्विधायकवचनाभावात्। द्वादशे ३५

हनि नारायणबलिः। तत्प्रकारमाह बौधायनः। नारायणबलिं शिष्यः स्वकर्त्तव्यो द्वादशेऽहनि। कृत्वा र्मैंहाविष्णोः पूजां पायसं च
निवेदयेत्। अग्नौ कुलावुत च्छेनं व्याहृतीभिः समाहितः। यतीनां हस्त्यान्साधुन्वानि मंत्रद्वादशावरान्। अभ्यर्च्य गंध
पुष्पाद्यैर्मंत्रैर्द्वादशनामभिः। संयोज्य हव्येनान्नेन दक्षिणां च निवेदयेत्। त्रयोदशं द्विजश्रेष्ठमात्मसंरक्षं जितेंद्रियं विष्णु
र्यथा तथाभ्यर्च्य पाद्याद्यैश्च विधानतः। दद्यात्पुरुषसूक्तेन पुष्पहव्यादिकं क्रमात्। नस्त्रा त्वं कारणाद्दी नियथाशक्ति प्र
दापयेत्। उच्छिष्टसन्निधौ तस्य दर्भाना स्तीर्य भूतले। भूर्भुवः स्वः स्वधा तुभ्यं तस्मै दद्याद्बलित्रयं। अश्वमेधसहस्रस्य
वाजपेयशतस्य च। यत्फलं तत्फलं देव यः करोति यतिक्रियामिति। शौनकोक्तं। शौनकोऽहं प्रवक्ष्यामि नारायणबलिं प
रं। चंडालाद्युदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि। दंष्ट्रिभ्यश्च पशुभ्यश्च रज्जुशस्त्रविषादिभिः। देशांतरमृतानां च मृतानां
न्वान्यसाधनैः। जीवच्छ्राद्धमृतानां च कनिष्ठानां तथैव च। यतीनां योगिनां पुंसां अन्येषां मोक्षकांक्षिणां। पुण्यापापक्ष
यार्थाय द्वादशेऽहनि कारयेत्। द्वादश्यां श्रवणे वांते पंचम्यां पर्वणि स्तुवा। इत्युक्त्वा विष्णुपूजादि व्याहृतिहोमांते अन्नेन दे
तिषड्भिः पुरुषसूक्तेन प्रत्यृचं पायसं हुत्वा केशवादिद्वादशनामभिस्तर्पणे। द्वादश विप्रान्भोज्य तैरेव द्वादश पिंडान्दद्या

36 दिस्यधिकं बौधायनवचनाद्याह। द्वादशाहाद्युक्तकालासंभवे द्वादश्याद्यः षट्कालाः। तेष्वपि पूर्वः पूर्वः श्रेयान्। त
त्र द्वादशी श्रवणपंचम्यः शुक्लपक्षाः। पर्वणोरपि पौर्णमासी पूर्वा। असंभवेत्वमितिविशेषः। यमः। हंसे मृते सुतः कु
र्यात्पार्वणं पितृयज्ञवत्। नारायणबलिं चैव तथा परमहंसके। विष्णुं संपूज्य विधिवद्दत्वार्घ्यं बलिमुत्तमं। चरुं कृत्वा तु
स्वेनैव पौरुषेण तु षोडश। केशवाद्यैर्नामभिस्तु नामभिर्जुहुयात्ततः। द्वादश ब्राह्मणान्भोज्यानि त्वर्थं लिङ्गत्रयोदश। पू
र्वपक्षे केशवाद्याः कृष्णे संकर्षणादयः। एवं कृते विधानेन नारायणबलौ द्विजः। विष्णुलोकमवाप्नोति पुरुषो नात्र संशय इ
ति। अथ द्वादशाहेऽन्येवाराधनं। तत्र असंभवे शुक्लद्वादश्यां कार्यं द्वादश्यामथवेति नागरखंडवचनात्। तत्र असंभ
वे त्रयोदशी वा। आचारात्। तत्प्रकारो नागरखंडे। द्वादशाहे मृताहे च आराधनमथाचरेत्। श्रीगुरुं तद्गुरुं चैव पर
मेष्ठी गुरुं तथा परात्परगुरुं चैव केशवादीन्स्वनामभिः। गुर्वर्थे चतुरो विप्रान् केशवादीन्स्वशक्तितः। संपूज्य भोजये
दन्नैः सघृतव्यंजनादिभिः। द्वादश्यामथवाप्युक्ते सम्यगाराधनं चरेदिति। मृताहे चेति चकारात् षोडशश्राद्धकालेषु।
मासिकेतिमासं चेति पूर्वोदाहृतवचनात्। गुर्वर्थे चतुर इति। गुरुपरंपरितनामधेयार्थे प्रतिनामधेयं चतुर इति। प्र ग०ए० ३६

तिनामधेयमेकैकइतिचतुर्णांमर्ध्यचतुरइतिवा। आद्यपक्षेगुर्वादिचतुष्टयार्थंषोडश। द्वितीयेचत्वारइतिभेदः। उक्त
त्रयांतेपरमसंगुरुंविहायाद्यौविश्वरूपधर्माचार्यंततोगुर्वादित्रयं। ततःकेशवादित्रयमेवंमकारउक्तोग्रंथांतरे। विश्वरू
पधर्माचार्यंगुर्वादित्रयमेवच। केशवादीस्ततःशुक्लेकृष्णेसंकर्षणादिकानिति। कन्याभार्यादिस्त्रीकर्तृकयतिसंस्का
प्रः
रेतुविप्रद्वारावैदिकमंत्रकःस्वयंपतिकोवापौराणेनामान्यतरमंत्रकःप्रयोगः। सन्निकृष्टोयतेःपुत्रोयदिस्वपितृ
नाशनं। कृत्वानुवपनंस्नात्वाशुद्धात्मायतिसत्क्रियामितिपितृमेधपद्धतिस्मृतिवाक्यपुत्रपदस्याधिकारिमात्र
परत्वात्। अधिकारसंपादकंकृच्छ्राचरणंवपनंचविधवायाः। सधवायाःपरंकृच्छ्राचरणमेवेतिविशेषः। असंनिकृष्ट
पुत्रादिरविशेषः। पितृमेधपद्धतौ। असन्निकृष्टश्चेत्पुत्रःसिद्धियात्रांपितुस्तदाश्रुत्वेतिशेषः। स्नात्वावपनपूर्वंचशुक्ला
यांतदंतरा। दशम्यामेवकुर्यात्पुनारायणबलिंसुतः। इति। अस्यार्थः। देशांतरगतःपुत्रोब्रह्मीभूतस्यपितुःसिद्धियात्रां
श्रुत्वावपनपूर्वकंस्नात्वाचारप्राप्तपूजनादिदशाहांतमविकृतंकृत्वाएकादशाहेपार्वणादिसन्निकृष्टवदविकृतंकुर्या
त्तद्दूरंचकृष्णपक्षमतिक्रम्यशुक्लपक्षेतत्कृत्वाणेवपनस्नानभोजनाद्यविकृतं। तत्रद्वितीयादिदिनमारभ्यनारायणब

लिकाजाह्नव्यां यदि स्युः कस्याम्या पातस्तदा तत्रैव नारायणबलिं कृत्वैकादशेऽह्नि पार्वणं द्वादशेऽहन्याराधनमिति।
इदं च एतस्यैव ज्ञानमात्रादेः तद्वाक्ये पुनः सुतग्रहणात् मुख्याधिकारित्वेऽतस्यापि भवति। अत्र पदस्याधिकारिमा
त्रोपलक्षणकत्वादिति सुधीभिरूह्यं। एवं कुर्वतः फलं पूर्वमेवोक्तमश्वमेधसहस्रस्येत्यादिना। तथा। नाशौचं न शोक
श्च गोत्रिणां कुर्यतो मृते। गृहे प्रजादिकं कार्यं एतत्पार्श्वमनो प्रभुभिः। द्वादशाहमनध्यायः शिष्यः कुर्यात्समाहितः। खननं
वहनं स्पर्शनं संस्कुर्वन् शुद्धिमृच्छति। असंस्कृतं विशीर्यन्तं यस्मिन्देशे कलेवरं। धर्मलोपो भवेत्तत्र दुर्भिक्षं मरणं ध्रुवं।
दिवंगते गुरौ शिष्यैः सदा कार्यं प्रपोषणं। स्नात्वा सचैलं यतिभिरेष धर्मः सनातनः। न स्नानमाचरेद्भिक्षुः पुत्रादिनि
धने श्रुते। पितृमातृक्षयं श्रुत्वा स्नानाच्छुध्यति सांबर इति। इति श्रीप्रतिष्ठानपुरवासी तोरोनारायणात्मजरुद्रदेवकृतप्र
तापनारसिंहाख्ये संस्कारप्रकाशे यतिसंस्कारोपयोगिनिर्णयः समाप्तः। शाके दृगग्निवसुचंद्रे विकृताब्दे नारायणे।।
पौषे कृष्णदशम्यां यामिप्रतिष्ठानपुरे शुभे। १। तोरोनारायणसुतो रुद्रदेवो महासुधीः। ग्रंथानेकान् संवीक्ष्य सारमुद्धृ गण॰
त्य यत्नतः।।२।। प्रतापनारसिंहाख्यसंस्कारस्य प्रकाशकं समाप्तिमकरोत्तत्र विदुषां प्रीतये सदा।।३।। बालानां सुखभो ३७

37

पायः प्रयोगोयं निरूपितः ॥ अनेन प्रीयतां देवनारसिंहो भक्तवत्सलः ॥ ७ ॥ इति प्रतिष्ठानपुरवासीतोरोनारायणात्म
जरुद्रदेवकृतो प्रतापनारसिंहाख्यो संस्कारप्रकाशः समाप्तः ॥ श्रीमत्प्रतिष्ठानपुराधिवासीतोरोपनाम्नः श्रुतिशास्त्र
वेत्ता ॥ नारायणस्यात्मजरुद्रदेवप्रोल्लेलिखेखवद्रघुनाथविप्रः ॥ ८ ॥ श्रीमत्तोरोरुद्रदेवकृतोयं स्मृतिसंग्रहः ॥ प्रतापना
38 रसिंहाख्योसंस्काराणां प्रकाशकः ॥ ९ ॥ अनंतपुत्रो विलिखद्राघवो भक्तसुरप्रियः ॥ अनेन प्रीयतां देवरुक्मिणीवल्लभो
हरिः ॥ १० ॥ संवत् १८३५ शाके १७०० कार्तिकशुक्लप्रतिपद्बुधवासरे श्रीमत्काश्यां वास्तव्य आभ्यंतरनागरज्ञातीयपं
डितोपनामकचंद्रदेवस्सूनुपंडितोपनामककाकूदेवनपालपंडितोपनामकश्यामदेवस्यापत्यं पंडितोपनामककस्तूर्यदेवे
न लिखितं पुण्यविनायकसमीपे वसति ॥ लिंबजादेव्यै नमः ॥ शुभमस्तु ॥ अपायाच्चिरं पायात् ॥ लंबोदराय नमः ॥ शुभं ॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ सहस्रार्जुनाय नमः ॥ लक्ष्म्यै नमः ॥ गण०

३८